This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ लक्ष्मीमालोकयन्तुल्भ्यन्निगममुपहसन् शोचयन्पद्मजं तं नम्रस्त्र्यंशो एणाक्षिपश्यन् सुमितिरशमुखं वीक्ष्य रोमांचमंचम् ॥ दृष्ट्वाहेयं गवीनं चकितमपसरन् स्नेहघरं केरिंगं तानूसिद्धं दं ते न भक्ष्यमिं तिलमिव तुलयन्पातु कपीतवासाः ॥ १ ॥ भारत्याः शास्त्रकांतारश्रांतायाः शांतिकारिणी ॥ क्रियते भानुना भूरिरसा रसतरंगिणी ॥ २ ॥ वाणीक मलिनी भानोरेषा रसतरंगिणी ॥ हंसाकुलधियस्तत्र युक्तमत्र भवीयतां ॥ ३ ॥ मिरां देविन रंगिएयां वा रसक्रूर वारणान् ॥ पद्विध्याति लोकानामाविलो विरलो रसः ॥ ४ ॥ हेतोः पूर्ववृत्तित्वनियमात्तः पूर्वमेव तस्योपन्यासः समुचितस्तस्य हेतवो भावा यत्ते नतेभ्यः पूर्वं भावा एव निरूप्यंते ॥ रसानुकूलो विकारो भावः ॥ विकारोन्यथाभावः ॥ विकारश्च द्विविधः ॥ आंतरः शारीरश्च ॥ आंतरोपि द्विविधः स्थायि भावो व्यभिचारिभावश्च ॥ शारीरास्तु सात्विकभावाश्च ॥ यत्तु मनोविकारो भावस्तत्र यान्यत्र न्मेरदेहविकारेस्वेदादौ भावपदप्रयोगो गौण इति ॥ न तुल्य वद्भयत्रापि भावपदप्रयोगेण विनियंतुमशक्यत्वात् ॥ लक्षणानुरोधेन लक्ष्याव्यवस्थितेः ॥ इतरभावस्यात्मभावलोपनायकत्वे सति सजातीयविजा तीयभावानभिभाव्यः प्रथमः ॥ इतरानभिभाव्यो मनोविकारः सकलप्रधानो मनोविकारो वा स्थायीभावः ॥ न च व्यभिचारिणिसात्विकभावे वाव्य भिचारः ॥ तस्येतरभावस्यात्मभावलोपनायकत्वाभावात् ॥ चरमसमयपर्यंत स्थायित्वाद्रस्य स्थायित्वव्यपदेशः ॥ स चाष्टधा ॥ रतिर्हासश्च शोकश्च क्रो धोत्साहो भयं तथा ॥ जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ १ ॥ तत्रेष्टवस्तु समीहाजनिता मनोविकृतिरपरिपूर्णा रतिः सा चा क्वचिद्दर्शनेन क्वचि च्छ्रवणेन क्वचित्स्मरणेन ॥ यथा चक्षुर्दृष्टो वल्लोनिगदितं पीयूषपाथोधरो भूसंज्ञापरिचारिका समजनि स्फीतं स्मितं रोहदं ॥ संतापं तरुणार्ककर्कशरुचिं नि यैस

श्वासवाताहतिं ... स्मादेष सहिष्णुते सरविस च प्रेमद्रुमः कोमलः ॥ कोमलपदादपूर्णता ॥ कुतूहलकृतवचनवेषवैसादृश्यकृतो मनोविकारः परिमितो हासः क्वचन भेदवेषभेदकृतेभयेक्रोधेन ... नातिव्याप्तिः ॥ तत्र कुतूहलकृतत्वाभावात् ॥ यथा जातनचरणानां ... आगच्छन्नगरोपकंठमिलितैराभीष्टितो बालकैः शुद्धांते परिचारिकाभिरचिरं सोल्लासमावेदितः ॥ साकूतं सकुतूहलं बलिवधूवृंदे पुरोदापयस्यन्त्रं किंचिद्दरं चितस्मितलवपायसवो वामनः ॥ १ ॥ लवपरात्पूर्णता ॥ इ ष्टविश्लेषजनितो रत्यनालिंगित परिमितो मनोविकारः शोकः ॥ न चेष्टविश्लेषजनितविप्रलंभशृंगारस्य करुणात्वारसत्वापत्तिः ॥ तस्य रत्यालिंगितत्वात् ॥ न च रतिः प्रीतिस्तया विना शोकोपि नोत्पद्यते न चासंभव इति वाच्यं ॥ इष्टसमीहाजनितमनोविकृतेः रतेरुक्तत्वात् ॥ कुमारसंभवे रत्याः कादंबर्यां महाश्वे तायाः रघुवंशे अजस्य प्रलापे करुण एव रसस्तत्र तत्र बाधनिश्चयेन इष्टवस्तुसमीहाया अभावात् ॥ यत्र च मृतस्तत्र एव जीविताशा तत्र शृंगार एव रसः ॥ बाधसंदेह स्यग्रात्यसंदेहपर्यवसिततया समीहाया अप्रतिबंधात् ॥ तथा च यूनोरेकतरस्मिन्मृते प्रलापः ॥ करुण एव रसः जीवितोः विश्लिष्टयोः प्रलापः शृंगाररसः अत एव रससरलदीपिकायां करुणरसोदाहरणं ॥ अपि ... जीवितजीवनाथे सीसं भिधायोच्छितया तया पुनः ॥ रक्ताभपुरुषाकृतिक्षितौ हरकोपानलभ स्म केवलं ॥ १ ॥ ननु विप्रलंभशृंगारस्य पूर्वानुरागभासमात्र करुणात्मकत्वाज्जीवतोरपि विप्रलंभस्य करुणरसत्वमायातमिति चेत् सत्यं तत्र करुणर सस्यांगत्वेन भासमानत्वात्करुणात्मकत्वव्यपदेशः ॥ यथा ॥ विरहज्वरमूर्छया पतंतीं नयनेनाश्रुजलेन सिच्यमानां ॥ समवेक्ष्य रतिं विनिश्वसंतीं क रुणाकुञ्जलिता बभूव शंभोः ॥ कुञ्जलितपरात्पूर्णता ॥ अनाहितः प्रमोदप्रतिकूलः परिमितो मनोविकारः ॥ क्रोधः प्रमोदप्रतिकूल इति वि

Acc: No- ~~7060~~ M824
Title - रसतरंगिणी.
Author - भानुदत्त
Pages - 18

K K S U LIBRARY RAMTEK 441 106 Dist. Nagpur M-824

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० तं गि

२

शेषणा दृशासुरवद्दुर्वचनावमानितस्य रामस्य वीररसेनातिव्याप्तिः ॥ यथा ॥ परशुरामवाक्यं ॥ नाधारभ्युकरोमि कार्मुकलतां विन्यस्तहस्तांबुजः किंचित्प
टलभासि लोचनयुगे तावन्निमेषोद्यतान् ॥ यावत्सायककोटिपाटितरिपुक्ष्मापालमौलिस्खलन्मल्लीमाल्यपतत्सरागपटलैर्नामोहिनी मेदिनी ॥ १ ॥
किंचित्स्वल्पपदादपूर्णता ॥ शौर्यदानदयान्यतमकृतः परिमितो मनोविकार उत्साहः ॥ वीरस्तु युद्धदानदयावीरभेदात् त्रिधा युद्धवीरस्योत्साहो यथा ॥
सेनां संघर्षयन्स्फुरति र्ह रिपुणायन्नृपं चमत्कारयन् नेत्रस्याभिमुखो भविष्यति जगद्विद्रावणो रावणः ॥ इत्युत्साहविचारमूढहृदयो रक्षोरघूणां
पतिर्न्यासचिन्यासविधिविनैव विशिखं बाणासने न्यस्तवान् ॥ १ ॥ अत्र विचारपदादपूर्णता ॥ दानवीरस्योत्साहो यथा ॥ आदर्शीय शशांकमंडमिह
हर्म्याय हेमाचलं दीपाय द्युमणिं महीमिव कथं नो भिक्षवे दत्तवान् ॥ दत्तापल्लवितक्रमोदसलिलव्याकीर्णनेत्रांबुजो जानीमो भृगुनंदनस्तदखि
य लं न प्रोशोद्दृष्टवान् ॥ २ ॥ पल्लवितं न फलितमित्यपूर्णता ॥ दयावीरोत्साहो यथा ॥ दुस्तारसंसारपयोधिपारं प्रकारमालोकयतो जनानां ॥ समु
त्थितो वक्षसि कैटभारेः कृपांकुरः कौस्तुभकैतवेन ॥ अंकुरपदादपूर्णता ॥ अपराधविह्वलतरविह्वलसत्वारिजनितो परिपूर्णो मनोविकारो भयं
यथा ॥ तार्क्ष्यपक्षपवनोपसेवितं वीक्ष्य वीक्ष्य यदुनंदनं पुरः ॥ भीतभीत इव तत्र कालियो मंदमंदमुपसर्तुमुद्यतः ॥ इवोपन्यासमदपूर्णता ॥ अस्
पृ दर्शनस्पर्शनस्मरणजनिता मनो १ निरपरिपूर्णा जुगुप्सा ॥ यथा ॥ शार्दूलशावकचटच्चटपाट्यमानसारंगभंगवतिभूम्नतिरामचंद्रः ॥ बा
संचकार खनभारतथा जुगुप्सां दुःखेषु दुःखमतिरेव न दखितानां ॥ २ ॥ नन्वेति पदादपूर्णता ॥ चमत्कारदर्शनस्पर्शनस्मरणाजनितो परि

राम०

२

पूर्णो मनोविकारो विस्मयः ॥ यथा ॥ युध्यंतमर्जुनं वीक्ष्य केवारेवानविस्मिता ॥ न मेने बहु गोविंदो दृष्टकर्णपराक्रमः ॥ न मेने बहुलितिपदादपूर्णता ॥ शृंगारादेः
चमत्कारदर्शनाद्यत्र मनो विह्वलितं गलत्याभासते तत्र शृंगार एव रसः ॥ यत्र प्राधान्येनाभासते तत्राद्भुत एव रसः ॥ अंगतया यथा ॥ वैशम्यं श्रुतिपंकजास्रकृदयत्या
नं स्त्रीरंदृशोः स्वर्णालंकरणाद्य, न क्तिपुलकोवैधर्म्यमंगश्रियः ॥ तस्यानूपुरपद्मरागमहसः पादारविंदश्रियो भेदं सिंजितमेव वक्ति किमतः शिल्पं विधेर्वर्ण्यतां
प्राधान्येन यथा ॥ विनासायकं कोयं समुत्पतति सौरभ्यसुभगः किरन्योत्स्नाम छोमाधिधरणितारापरिवृढः ॥ धनुर्धर्तेस्मारं लिखति विहारं न तम सोनिरातंकः पंके
रुहयुगलमंकेन स्पृशति ॥ [illegible] रसतरंगिण्यां [illegible] प्रथमस्तरंगः ॥ अथ विभावा निरूप्यंते ॥ विशेषेण भावयंति
उत्पादयंतीति विभावाः ते च द्विविधाः ॥ आलंबनविभाव उद्दीपनविभावाश्चेति ॥ यमालंब्य रसः प्रवर्तते स आलंबनविभावः ॥ यो रसमुद्दीपयति स उद्दीपनविभावः ॥
तत्रालंबनविभावो यथा ॥ प्राणस्य प्रतिमूर्तिः प्रस्तात्मापुण्यलतिकायाः ॥ अधिदेवतं नयनयोः सा मम मया कापि सा सेव ॥ शृंगारस्योद्दीपनविभावाः ॥ तत्र भरतः
ज कुसुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः ॥ उपवनगमनविहारैः शृंगाररसः समुद्भवति ॥ चंद्रनारयउद्दीनीयाः ॥ यथा ॥ संध्याशोणांबरजवनिकाकामिनोः
प्रेनाट्यं नांदी भ्राम्यद्भ्रमरविरुतं मारिषः कोपिकालः ॥ तारापुष्पांजलिमिव किरद्दत्तयन्पुष्पकेतोर्नृत्यारंभं प्रविशति सुधादीधितिः सूत्रधारः ॥ हास्यविभावाः ॥
तत्र भरतः ॥ विपरीतालंकारैर्विकृताचाराभिधानवेषैश्च ॥ विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥ अंगविकृतास्य उद्दीनीयः ॥ यथा ॥ केयूरं घर्घरयन् स्व
भ्रमयन्मौलिं विवर्तयन्ग्रीवां हूनू ॥ नेत्रांचलं चलयन्नृत्यति मायाशिशुश्छायां ॥ करुणस्य विभावास्तत्र भरतः ॥ इष्टजनस्य विनाशाच्छायाक्लेशाश्च बंधनाश्चसना
त् ॥ अस्मात्स्वार्थविशेषात्करुणरसाख्यः समुद्भवति ॥ बंधादिरुद्दीपनीयाः ॥ यथा ॥ तां पश्यतो भुजगपाशनिबद्धदेहमद्यापि मय्यदसतेन बहिः प्रयांति ॥ ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेनिमिलयसि पश्यसि नैव तावद्रासं मरीयमिति लक्ष्मणयुक्तमेव ॥ वीररसस्य विभावाः ॥ तत्र भरतः ॥ आयुधखड्गाभिभवाईकृतभेदादिदारुणाश्चैव ॥ संग्रामसंभवार
र्थश्चैष संजायते रौद्रः ॥ वैरिदर्शननिर्भर्त्सनाद्यस्य उद्दीपनाः ॥ तन्वंती तिमिरद्युतिं कृतवति मस्पर्धि नक्र यथा मेघो भार्गवलावकी विजयो निस्त्रिंशधारा निशा ॥ युद्धकु
थविपक्षपक्षविरहकुंभीरकुंभस्थलभ्रष्टमौक्तिककेतवेगपरितः तारावलिवर्षति ॥ वीररसस्य विभावाः ॥ तत्र भरतः ॥ उत्साहाध्यवसायादविषादित्वादविस्म
यान्मोहात् ॥ विविधादर्थविशेषाद्वीररसो नाम संभवति ॥ विनयबलाद्यस्य उद्दीपनाः ॥ अस्य वीरस्य विभावो यथा ॥ लंकाधिपः संप्रति शंकनीयो जभारिरंभापहृधा
दुर्यिः ॥ इत्यालपंतं हनुमंतमेष रामः स्मितेरुजरयांचकार ॥ दानवीरस्य विभावो यथा ॥ वपुषा विनयं वहति केचिद्वह सा कपिचरं तिचारुचर्या ॥ अतिथोसमुपागतेस्य
पर्यंपुलकैः पल्लुवयति कपिस्तं ताः ॥ दयावीरस्य विभावो यथा ॥ कथमविरलभाग्यइक्ति भाजो नृपाः यातमसि दुरयगाहेभ्राणि नो वीक्षणीयाः ॥ रतिकिमुसमुद्र
दीपकलेखाभिराम द्युतिमुरसिमुरारिः कौस्तुभं सवभार ॥ ननु स्वनिष्ठो साहः कथमुद्दीपनविभाव इति चेत् सत्यं ॥ उद्दीपनविभावो ज्ञायमान एव गमकः स्वस्य
निष्ठपरनिष्ठो वेति न विशेषः ॥ अनुभावस्तु स्वनिष्ठ एव गमकः ॥ तस्यानुमापकत्वेन पक्षे वृत्तित्वनियमादिति ॥ ननु दयावीरः करुण एव कथं नांतर्भवति निरुपा
धिपरदुःखप्रहाणेच्छास्या सा च करुणया विना न संभवतीति चेत् ॥ करुणस्य स्थायिभावः शोकः दयावीरस्य स्थायिभाव उत्साह इति स्थायिभावभेदेन भेदात् ॥ न
नु दयावीरे करुणरसप्रतीतेः का गतिरिति चेत् सत्यं ॥ करुणया विना दयावीरस्यानुभवात् अत्र करुणाया अनुभावकत्वादिति ॥ भयानकस्य विभावाः ॥ तत्र भरतः
विकृतरवसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ॥ गुरुनृपयोरपराधात् कृतकः स भयानको ज्ञेयः ॥ बंधुवधबंधनश्रवणश्मशानदर्शनादय उद्दीपनीयाः ॥ यथा ॥ उज्ज्वलां
तिकठोरकेसरदलत्साथो धरत्रस्खलद्दैत्युद्दीधितिका वनिह्नतजगन्निःशेषभूमीधरः ॥ स्फूर्जल्लंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजः प्रौढाशीर्वचनम्र राम

ना
दर्शितबालिर्व्यालोकि मायाहरिः ॥ बीभत्सस्य विभावाः ॥ तत्र भरतः ॥ अनभिमतदर्शनगंधरसस्पर्शदोषैश्च ॥ उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥ उत्प्र
वेक्षणांश्रवणस्मरणाद्यस्य उद्दीपनीयाः ॥ यथा योधानाम् अथ वैरशोककुसुमे नैव सितरंबुजैः दृतेः कुंदस्ले करैः सरसिजे संपाद्यपुष्पांजलिं ॥ झिल्लीकर्णयुगं विधायकरिणां
रक्तावसिक्तांगकैः प्रेतानां वदुभिः रामसुरभिद्दोन्नसमारभ्यते ॥ अद्भुतस्य विभावाः ॥ तत्र भरतः ॥ यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं च ॥ तत्सर्वमद्भुतरसो द्भुतो
नाम संभवति ॥ मायेंद्रजालादयस्य उद्दीपनीयाः ॥ यथा ॥ उद्दामोद्दाममाद्यत्प्रतिभटदलनोद्यज्जायत्स्वभावः सो बभूवानुदेवो भवतु नरहरिस्त्वां रिरक्षो विभुश्च ॥ यस्येशोद्रप्रतो
पोद्भटसटाकोटिभिः पाटितोभ्रमणैर्भोधरणां वाहरिकनिर्यद्विद्युतांकेतवेन ॥ इंद्रजालं यथा ॥ ओमित्युक्त्वा गणसीम्निसांध्यकिरणं विस्तार्य चैलांचलं ध्यातेकामनपां
सुभिः निजगतीने आणि संमोहयन् ॥ तारा शोकिकमौक्तिकानि विहगश्रेणीरथच्छन्ना नासिं स्रिकृत्यवारिः करोति वृहनालसायुगो मायिकः ॥ इति श्रीभानुदत्तमिश्रविरचिता
यां रसतरंगिण्यां विभावनिरूपणं नाम द्वितीयस्तरंगः ॥ अथानुभावा निरूप्यंते ॥ ये रसान् अनुभावयंत्यनुभवगोचरतां नयंतीति तेनुभावाः कटाक्षादयः ॥ करणत्वेन चा
नुभावकता ॥ करणत्वं च फलायोगव्यवच्छिन्नकारणत्वं ॥ रसस्य कथमनुभावकापेक्षेति चेत् ॥ यतः स्थायिभावः परिपूर्णो रसः तस्य चांतरत्वात् आपकत्वेन विना कथं ज्ञा
नमित्यनुभावकस्यापेक्षणीयत्वात् ॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति ॥ दृष्टे कटाक्षादौ कामिनीमनोविकारः परिपूर्णो भवति ॥ अनुभवसिद्ध
त्वेनापह्नोतुमशक्यत्वात् ॥ किंच प्राचीनसंमतिरपि ॥ इषद्वक्रितपक्ष्मपंक्तिभिरनाकूतस्मितैर्वीक्षितै रागैरेव लघुसुंदरिकरक्तोज्जगद्वर्तते ॥ अंतः पांसुलहेम
केवकरलद्रोणीदुरापश्रियो दोर्मल्लस्य विभावनादिह पुनः कुर्वे किमाकांक्षसि ॥ इति चेन्न ॥ स्वयं कटाक्षादिभिः करणत्वेनानुभावकत्वे विषयत्वेनोद्दीपनवि
भावत्वं तथा च नायिकाग्निरसानुभावकरणत्वेन नायिकां प्रति कटाक्षादयोनुभावा अपि ते चद्दष्टिगोचरीभताः कामिनो मनोविकारं कारयंतो विषयत्वेनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीपनविभावाइति ॥ सचानुभावः कायिकमानसाहार्यसात्त्विकभेदाच्चतुर्धा ॥ कायिका भुजाक्षेपादयः मानसाः प्रमोदादयः नाट्यं चतुर्भुजलज्ञानमाहार्यं ॥
सात्त्विकारोमांचादयः ॥ शृंगारस्यानुभावाः ॥ तत्र भरतः ॥ नयनवदनप्रसादैः स्मितमधुरवचःप्रमोदैश्च ॥ विविधैरंगविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥
कटाक्षभुजाक्षेपादयऊहनीयाः यथा ॥ मुक्ताहाररत्नकलशयोः कर्णयोः कर्णिकारमालामाल्यापरिभ्रमभयादरएवेन्यवारि ॥ दृष्टेभीष्टे समजनिपुनः सुभ्रु
वोभूषणायप्रशालबालोत्तरेलकमल्लहेहरसः कटाक्षः ॥ हास्यस्यानुभावाः ॥ तत्र भरतः ॥ विकृताकारैर्वाक्यैरंगविकारैश्चविकृतवेषैश्च ॥ हास्यं जनयेद्यस्मा
त्तस्माज्ज्ञेयोरसोहास्यः ॥ आस्याधरविवरणकपोलस्पंदद्व्याकुंचनादयऊहनीयाः ॥ यथा पात्रीहस्तकपालमंडलमिदंपीयूषभानोः कलांवार्तीहस्तफणा
मणिंफणिपतेः संपाद्यतस्मिन्शिरवांसायंदीपविधिं विनन्वतिथिशोमंदहसंस्तातयाकिं निकुंचरपांगभंगकुटिलादृष्टिः समारोपिता ॥ करुणस्यानुभावाः
तत्र भरतः ॥ अश्रुपातेनरुदितैर्मोहैः प्रलापपरिदेवनप्रलयैः ॥ अभिनेयः करुणरसोदेहायाताभिघातैश्च ॥ मुखशोषणवैवर्ण्यादयऊहनीयाः ॥ यथा ॥ जालेनिर्गच्छति
गणपतौनाकमध्यापितस्याः वाचां दैव्यालस्यजातिशिथिलंकंकणंनेवहोहा ॥ आघ्राप्याद्दीप्रवतिकुचयोर्नापिपाटीरपंकोनेत्रेनिर्यत्ययसिनपुनः कज्जलंस्रैर्यं
मेति ॥ रौद्रस्यानुभावाः तत्र भरतः ॥ नानाप्रहरणसंकुलशिरःप्रकंपैः करायनिष्पेषैः ॥ घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः ॥ भ्रुकुटिदंतोष्ठपीडनाद
यऊहनीयाः ॥ यथा ॥ येयेभीमेभकुंभभ्रुकुटिघनरवं दंतनिष्पीडितोष्ठं निसिताव्योम्निविंध्याचलनडुलचमत्कारभाजः करींद्राः ॥ तेषामेषांकपोलाद्विकभ
यविधुताकाचिदुड्डीयलग्नाविंबेपीयूषभानोर्मधुकरपटलीलांछनस्यछलेन ॥ वीरस्यानुभावाः ॥ तत्र भरतः धैर्यशौर्यवीर्यैरुत्साहपराक्रमप्रभावैश्च ॥ वा

क्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ नन्वतींद्रियस्यरसस्य आ प्रकाशरीरधर्माभावितुमर्हन्तिन एवसर्वत्रोक्ता ॥ तथा च धैर्योत्साहौनशरीरधर्मौ धैर्यपदेन
चाक्यस्याभाव उत्साहपदेनचाश्रुपुलकादयोलक्षिताः ॥ सुखानुभावश्चतुर्विधः तत्र मानसोप्यनुभवः ॥ सचस्त्रायमानएवगमकः सच मानसरैन्द्रियकश्चे
तिनकश्चिद्विशेषः ॥ विजयबलस्यऊहनीयाः ॥ युद्धवीरानुभावोयथा ॥ अग्रेवासवजित्समग्रसमरव्यापारदीक्षागुरुः पार्श्वेतस्यविपक्षपक्षदलनोक्रीडाभनो
रावणः ॥ स्तब्धंनल्पतिसर्वतः परिजनेसंध्यास्थलिंकुर्वते श्रीरामस्यनकुंभकस्यपद्मवेसुछासकोपिक्रमः ॥ दयावीरानुभावोयथा ॥ ओदास्यं नविधेहि गच्छ
नगहासंवीक्ष्यमनद्धजनया चेत्किंचभवंतमेतदखिलं कोलसंभ्यताः ॥ दासश्चेदहमस्मिचेद्धसुमती सर्वेवसागस्थिता स्वर्णे चेद्गुरुदक्षिणाधनपते सीयसं
पाद्यते ॥ दयावीरानुभावोयथा ॥ ध्वांतस्तोमधरैजगद्दयकरैपाथोधरैर्वर्षतिक्रोधद्ध्याकुलवत्सगोकुलदयार्दनिसणः शौरिवः ॥ हस्तन्यस्तमहीधरस्तुतिभया
त्रैवांगुलीपल्लवैःस्रस्तंवेणुमुरीकरोतिनतनोः स्रस्तहरत्यंशुकं ॥ भयानकस्यानुभावाः तत्र भरतः ॥ करचरणनेत्रमस्तकसर्वांगानांशकंपनैश्चैव ॥ शुष्को
ष्ठतालुकंठैर्भयानकोनित्यमभिनेयः ॥ रोमांचवदनवैवर्ण्यस्वेदादयऊहनीयाः ॥ यथा ॥ प्रस्तन्यस्तलतावलीढवदनव्याकीर्णफेनोच्चयं काकुव्याकुलघोरघर्घ
रवस्फारीभवल्लोचनं ॥ कंपप्रस्खलदंघ्रिनामनतनुश्वासोर्मिनुन्नाधरं वीक्षीर्णेभुजगस्यवक्त्रकुहरेहस्तस्यगावस्थिता ॥ बीभत्सस्यानुभावाः तत्र
भरतः ॥ आननेत्रविघूर्णनलोचननासापिधानेश्च ॥ अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः ॥ सर्वांगसंहारनिष्ठीवनादयऊहनीयाः ॥ यथा ॥ कूपदहरेनुव
कुहरेविध्यतेसंवीक्ष्यदिनकरं लक्ष्मीः ॥ हलहेत्यपललकवलभ्रांत्यामुखमंभुके पिदधे ॥ अद्भुतस्यानुभावाः तत्र भरतः ॥ स्पर्शग्रहणोल्लासैर्हाहाकारैश्च
साधुवादैश्च ॥ वेपथुगद्गदवचनसरभैदैरभिनयस्तस्यानिर्निमेषप्रेक्षणरोमांचादयऊहनीयाः ॥ यथा ॥ पांडवीक्ष्यदोर्दंडखंडितारातिमंडले ॥ अद्या

4

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० त
५

पिनाकिनां नेत्रे निमिषाने कृजाग्रति ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां अनुभावनिरूपणं नाम तृतीयस्तरंगः ॥ ३ ॥ अथ सात्विका निरूप्यं धा
ते ॥ नत्र भरतः ॥ स्तंभस्वेदोथ रोमांचः स्वरभंगोथ वेपथुः ॥ वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मताः ॥ ननु स्य सात्विकत्वं कथं व्यभिचारित्वं नकुलः सकलरससा
धारण्याहिति चेत् ॥ अत्र केचित् सत्वं नाम परकीयदुःखभावनायामत्यंतानुकूलत्वं तेन भूता ॥ सात्विका इति व्यभिचारित्वमनाद्यस्य सात्विकव्यपदेश इति ॥ नभ ॥
निर्वेदस्मृतिधृतिप्रभृतीनामपि सात्विकत्वव्यपदेशापत्तेः ॥ नच परदुःखभावनायामश्रावेवोत्पद्यंत इत्यनुकूलशब्दार्थः ॥ अत एव सात्विकत्वमप्येषामिति वाच्यं
निर्वेदादेरपि परदुःखभावनायामभ्युपपत्तिरिति ॥ अत्र स्फुरतिभाति ॥ सत्वशब्दस्य प्राणिवाचकत्वात् सत्वं जीवः शरीरे तस्य धर्माः सात्विकाः ॥ इत्थं च शारीरा भावाः
स्तंभादयः ॥ सात्विका भावा इत्यभिधीयंते ॥ स्थायिनो व्यभिचारिणश्चेति ॥ भावा आंतरत्वान्न शरीरधर्मा इति ॥ शरीरधर्मत्वे सति गतिनिरोधः स्तंभः नच
निद्रापराधादावतिव्याप्तिः ॥ शरीरधर्म इति पदेन तेषां वारणात् ॥ प्रलयभावी तु चेष्टानिरोधो न गतिनिरोधः अस्य विभावाः ॥ हर्षरागभयदुःखविषादवि
स्मयक्रोधाः ॥ यथा ॥ श्रोणीपीनतरा तनुः कृशतरा भूमीधराडंबरा वक्षोजस्य तटी कृतो निजकुटीमतर्मया गम्यतां ॥ इत्युद्राव्यकरे वकंजनिकटे विश्रम्य मं
दस्मितं वैणो हंसमुदीक्ष्य पक्ष्मलदृशा स्तंभस्तिरोधीयते ॥ वपुषि सलिलोद्गमः स्वेदः ॥ अस्य विभावाः ॥ मनस्तापहर्षलज्जाक्रोधभयश्रमपीडाघातम
र्दास्य ॥ यथा ॥ कांते तव कुच शांते राजंते स्वेदबिंदवः ॥ हृष्यता मदने नैव क्षता मौक्तिकवृष्टयः ॥ विकारसमुत्थ रोमांचः ॥ अस्य विभावाः ॥ शीतालिं
गनहर्षक्रोधाः ॥ यथा ॥ बकुलं च कलकौशरोषनिर्यन्मधुकरकूजितभाजि कुंभभूमौ ॥ पुलकपतितकपोलपालिमालिस्मितसुभगः कथमद्य नं राम
दसूनुः ॥ गद्गदत्वप्रयोजकीभूतस्वरभाववैलक्षण्यं स्वरभंगः अस्य विभावाः ॥ क्रोधभयहर्षमदाः यथा व्यक्तिस्यास्स्वरभंगस्य कोपाद्युक्तिः क्रियेत चेत् ५

इति पतुः परोराधामौनं धार्यतीति तिष्ठति ॥ भावत्वे सति शरीरस्पंदो वेपथुः भावत्वे सतीति विशेषणात् सत्वकस्पं हासौ नातिव्याप्तिः ॥ शरीरपदं चेष्टाश्रय
मात्रपरं तेन शरीरावयवकंपेनातिव्याप्तिः ॥ अस्य विभावाः ॥ आलिंगनदर्पभीसाध्वसः ॥ कथय कथमुरोजरामहेलो भैडुपतिरेष विनोति चंपकानि भवति
करतले मदस्यकंपः प्रियसखि स्फुरतिरिव मसपत्ली ॥ विकारप्रभववर्णान्यथाभावो वैवर्ण्यं ॥ अस्य विभावाः ॥ मोहभयक्रोधशीततापश्रमाः ॥ कु
कुदे कुर्वति कांते माननं स्त्रिक्त्योस्तयोः ॥ दिवाकरकराक्रांतशशिकांतिमिवादधौ ॥ विकारजनितमक्षिसलिलमश्रु ॥ अस्य विभावाः ॥ हर्षामर्षधूम
भयशोकजंभाशीतनिर्निमेषप्रेक्षणानि ॥ यथा ॥ विसृज विसृज चित्तदुःखधारामयमुपकंठमुपागतो मुरारिः ॥ इति कथयितुमश्रुबुद्बुदस्थाऽनिपतति
री६ वक्षसि पक्ष्मलायतास्याः ॥ शौरत्वे सति चेष्टानिरोधः प्रलयः ॥ शारीरत्वे सतीति विशेषणान्निद्रादेर्नातिव्याप्तिः ॥ स्तंभादयः शरीरधर्मास्तेषां साहचर्यकथनेन
प्रलयोपि शरीरधर्म एव तेनात्र चेष्टापदेन शरीरावयवचेष्टैवाभिमता ॥ मनसस्तु कर्म भवति न तु चेष्टा अत एव चेष्टाश्रयः शरीरमिति शास्त्रे स्वयंलक्षणं ॥ अस्य वि
भावाः ॥ रागो दुःखव्याहस्य(?)ः ॥ यथा ॥ नो वक्त्रं नमितं धुतं न च शिरो व्यापारितं नो वपुः वासो न श्लथमाहतं निगदितं नो वा निषेधाक्षरं ॥ शोलं नापि विलोचनं विरचितं
क्रीडाकलाकातरं चेतः केवलमर्पितं मधुरिपोर्व्यापारितं राधया ॥ जृंभान्त ॥ नन्वयं सात्विको भाव इति प्रतिभाति ॥ यथा ॥ जृंभानन्तमुल्लसकुचयुगं स्विन्नकपो
लस्थलं कुंचसद्भ्रमगलद्दुकूलमुदरं नाभिभ्रमद्रूलतं ॥ बालाग्रांगुलिबद्धबाहुपरिधिं न्यंचद्धिरन्तःत्रिकं उद्यत्कंचुकसंधिदर्शिनि सद्दोर्मूलमुज्जृंभत ॥ श्रृंगारति न
सो लकादौ च सात्विकभावसमानाधिकरण्यदर्शनात् तु ॥ ननु सात्विकभावो वानुभावो वेति विनिगमकत्वाविरह इति चेत् ॥ सत्यं ॥ अनुभावत्वे सति सात्विकभावत्वे
बाधकाभावात् ॥ पुलकादौ तथा दृष्टत्वात् ॥ न चांगाक्षेपिनेत्रमर्दनादीनामपि भावत्वापत्तिः ॥ तेषां भावलक्षणाभावात् रसानुकूलो विकारो भाव इति तल्लक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगारुष्यादयो हि न विकाराः किंतु शरीरचेष्टाप्रत्यक्षसिद्धमेतत् ॥ अंगारुष्टिरसि मर्दनं पुंसस्तैरिछयाविधीयते परिलक्ष्यते ऽभावाच ॥ विकारादेव भवति
तन्निवृत्तौ निवर्तते यथा ॥ आधायमाने रहसि स्थितायां संभाव्यजे भामवलात्मजायाः ॥ चुचुंबलिस्मेरमुखो महेशः करांगुलीभिः कलयांचकार ॥ इति
श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां सात्विकभावनिरूपणं नाम चतुर्थस्तरंगः ॥ अथ व्यभिचारिभावा निरूप्यंते ॥ तत्र भरतः ॥ निर्वेदग्लानि
शंकाख्या तथासूयामदश्रमाः ॥ आलस्यं चैव दैन्यं च चिंतामोहस्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा ॥ गर्वो विषाद औत्सुक्यं निद्रा पस्मा
र एव च ॥ सुप्तिर्विबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥ मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ॥ त्रयस्त्रि
शत्समीभावाः समाख्यातास्तु नामतः ॥ इतस्ततो रसेषु संचारित्वमनेकरसनिष्ठत्वमनेकरसव्याप्यत्वं वाव्यभिचारित्वं ॥ न च रोमांचादावतिव्याप्तिः ॥ तेषा
मपि संग्राह्यत्वात् ॥ ते च भावाः शारीरा व्यभिचारिणः ॥ एते चांतरा व्यभिचारिण इतीयांस्तु विशेषः ॥ ननु निर्वेदादेः स्थाय्यपित्वं व्यभिचारित्वं च कथमिति चेन्न ॥ रसप
र्यंतरुछापित्वमितरत्रगामित्वं चेत्सुपाधिभेदमादायोभयसंभवात् ॥ तत्त्वज्ञानेन निर्वेदः ॥ संसारे हेयताबुद्धिर्वा ॥ तत्र विभावाः तत्त्वज्ञानापदीर्ष्यादयः
अनुभावाः खेदप्रकाशचिंताश्रुपातादयः ॥ यथा ॥ क्षोणीपर्यटनं भ्रमाय विहितं धाराय विद्यार्जिता मानध्वंसनहेतवे परिचिता स्तेते धराधीश्वराः ॥ वि
श्लेषाय सरोजसुंदरदृशामा येऽकुलाद्दश्यः कुज्ञानेन मया प्रयागनगरे नाराधिनारायणः ॥ ग्लानिर्बलहानिः सहतावातस्य विभावाः ॥ रत्यायासक्षु
त्तडादयः ॥ अनुभावा वैवर्ण्यस्वेदकल्प दृग्भ्रमणादयः ॥ यथा ॥ व्याहर्तुं पुनरीक्षणाय न गिरः कंठाद्बहिर्निःसृताः शेषाश्लेषविधिं विधातुमपि वानेवोल
तारोलैता ॥ प्रातस्तल्पमपास्य गच्छति हरौ चंडांशुचंडातपक्लिष्टश्लिष्टकुरंगभंगुरदृशः स्रस्ताः स्थिता दृष्टयः ॥ उत्कटकोरिकानिष्टप्राप्तिसाधनमिष्टहानिचि

राम॰
॥ ६ ॥

चारो वा शंका ॥ तच्च दुर्नयपरक्रौर्यादय विभावाः ॥ अनुभावाः ॥ कंपक्रियाप्रच्छादनादयः ॥ यथा ॥ एते चित्रविलोचनागुरुजनात्सिद्धाग्रदोषाः खलाः पौ
राः क्रूरवचप्रपंचपरुषाः श्वश्रूश्च वक्षुश्रवाः ॥ किं स्यादिद्य मनर्थबीजमसकृत्संचिंत्य वक्षोरुहि स्फूर्जत्किंशुकदामवामनयना निश्वस्य विन्यस्यति ॥ परो
त्कर्षासहिष्णुता परानिष्टचिंतर्षा वासूया ॥ तत्र विभावाः मन्युदौर्जन्यादयः उनुभावाः कोपचेष्टादोषोद्भावनादयः ॥ यथा ॥ हरशिरसि मयाप्यलभ्यवासे
नियसति कापि कलानुषारभानोः ॥ इति त्रिवलितविधुं तु दस्यमूर्ति प्रतिभवनं प्रतिभूधरं भवानी ॥ हर्षोत्कर्षो मदः दुःखासंभिन्नसुखानुभव उत्कर्षः ॥ तत्र
विभावः पानं ॥ अनुभावः उत्तमानां निद्रा मध्यमानां हसितमधमानां रोदनं ॥ इंद्रियमोहरूपात्र निद्रा ॥ तस्मादिंद्रियसंमोहेन यन घूर्णनं साम्येन न निद्रेव नि
द्रा ॥ न च हर्षव्यभिचारिभावे तिव्याप्तिः ॥ तत्र हर्षमात्रस्य सत्त्वान्नतु तत्रोत्कर्षो जातिविशेषः ॥ किंच तत्र मनसो मोहोऽत्र च मनसः प्रसाद इति स्वरूपभेदात् ॥ तत्र निद्रा
रोदनादयोऽत्र च पुलकादयोऽनुभावा इत्यनुभावभेदाच्च ॥ ननु तिष्ठ तिष्ठ क्षणं मद मधुपापिवाम्परं ॥ इत्यादौ वीररसेपि मदो दृष्टोस्ति तत्र निद्रारोदने वा कथवा
कथमनुभावो न हि योधः संयति निद्राति रोदिति वेति चेत्तन्न ॥ सत्यं ॥ रसभेदे नानुभावभेदः श्रृंगारे तेऽनुभावाः वीरे नयनारुण्यचमत्कारादयः ॥ सामान्येन मदे
नयनघूर्णनवचनस्खलनादयः पश्यंति ॥ यथा ससनारसयत्यसौ मधुरस्य मधुपाकमनर्घकं जनुः ॥ इति तत्र समस्तमिंद्रियं प्रतिबिंबस्य मिषेण मज्ज
ति ॥ आयासप्रभवः पराभवः ॥ श्रमः ॥ तस्य विभावाः रत्यध्वगत्यादयः ॥ अनुभावाः खेदादयः ॥ यथा ॥ सरभसचंद्रसहनिर्गतायाः स्वेदांबुसंसक्तपयो
धरायाः ॥ अपांगप्रांते मिथिलालसायाः श्रमान्वशेषाणि शिथिलीचकार ॥ उत्थानाद्यक्षमत्वमालस्यं तत्र विभावाः गर्भादयः ॥ अनुभावाः क्रियाद्वात

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० त०

७

र्यादयः॥ यथा॥ हरं हरंतं स्तनहारयष्टिं करेण रोद्धुं नशशाक तावत्॥ गिरेः सुतागर्भवती विहस्य दृगंचलं कातरयांचकार॥ दुरवस्थादुःखाति
रेकोवादैन्यं॥ अनौज्ज्वल्यमितिकेचित्॥ तत्रतस्य बहिर्विषयत्वेन तदनुमापकत्वात् तत्र विभावाः॥ विरहदारिद्र्यादयः॥ अनुभावाः॥ कायक्ले
शासुसीडादयः॥ यथा॥ तातचरणानां॥ अंसे कुंतलमालिकास्तनतटेनेत्रांभसां निम्नगामाघन्मन्मथकुंजरेंद्रदशनप्रांते विलग्नं मनः॥ किंचा
न्यद्विरहानलेन सरसं संदह्यमानं वपुर्गंडे पांडिमकैतवेन सुतनोः फेनोच्चयं मुंचति॥ चिंताध्यानं॥ ध्यै चिंतायामित्यनुशासनात्॥ ध्यानं च स्मर
रणात्मकं स्मृतिभावस्याग्रे पृथक्त्वेन कथनात् अलं चित्तैकाग्र्यं तत्र विभावाः॥ इष्टानवाप्तिप्रभृतयः॥ अनुभावाः॥ तापवैवर्ण्यबाष्पश्वासादयः॥ यथा
शंभुं ध्यायसि शैलराजतनये किंनामजानीमहे तस्यैवाक्षितनं नु पादि च तनोस्तापः समुन्मीलति॥ अक्ष्णोरश्रुमिषेण गच्छति बहिर्गंगा गलत्
गावलिः पांडिम्नः कपटेन चंद्रकलिकाकांतिः समुज्जृंभते॥ मोहो वैचित्त्यं मुह वैचित्त्य इति धातोर्मोहनं मोह इति॥ भावव्युत्पन्नो मोहशब्दः॥
वैचित्त्यं कार्याकार्यपरिछेदः॥ तत्र विभावाः॥ भीत्याघातोगानौचित्यादयः॥ अनुभावाः॥ स्तंभपातघूर्णनादर्शनादयः॥ यथा॥ अंतःस्मेरसुवर्णके
तकदलद्रोणी धृति द्रोहिणं लक्ष्मीं वीक्ष्य समुद्यदिंदुवदनां क्षीरांबुधेरुत्थितां॥ शंभुः संभ्रमशालाकुलशतमखः कर्तव्यमूढेंद्रियः सोप्यज्ञानभुजंगप
रापतितोजातः स्त्रिलोकीपतेः॥ संस्कारजन्यं ज्ञानं स्मृतिः॥ संस्कारजन्यं ज्ञानं प्रत्यभिज्ञारूपं स्मरणरूपं च संस्कारजन्यत्वेनोभयसंग्रहः॥ अन्यथाप्रत्य
भिज्ञायाः पृथग्भावत्वापत्तेः॥ संस्कारोद्बोधकाः सदृशाः दृष्टचिंताद्याः॥ अनुभावाः॥ भ्रूसमुन्नयनादयः॥ प्रत्यभिज्ञा यथा॥ कालिंदीसरसः समेत्य नृ

भसः क्रोडपरिक्रीडते चक्रद्वंद्वमिदं सुधाकरकलामाक्रम्य विस्फूर्जति॥ चंद्रोपि स्मरचापचापलचमत्कारं समालंबते तेन स्मृत्यैव करंबकुंजकुहरे राधाप
रिभ्राम्यति॥ वदनांबुजलग्नं [illegible] पातुमयि बद्धलवतंसमंसमेले॥ दरकुंचितदृष्टिराधिकायाः स्मितकिर्मीरितमाननं स्मरामि॥ धृतिः संतोषा
दुःखेप्यनुद्वेगो वा विभावास्तु नशक्त्यादयः॥ अनुभावाः॥ अव्यग्रभोगादयः॥ यथा॥ भस्माभस्म रजांसि वेश्म विपिनं वृद्धो वृषो वाहनं चैलं चर्म तथापि म
न्मथरिपोर्भोगः किमुत्कस्य त॥ ईशत्वं किमु हीयते किमु महादेवेति नो गीयते किं वातस्य नरेंद्र देवदेवेति वासं ज्ञाजनैस्त्यज्यते॥ स्वापराधक्रियासंकोचो
व्रीडा॥ न च शंकायां त्रासे चातिव्याप्तिः॥ तत्र क्रियाविरहादेव न तु क्रियासंकोचः॥ अत्र विभावाः॥ दुराचारादयः॥ अनुभावाः॥ शिरोनमनव
ननयनप्रच्छादनादयः॥ यथा॥ अयोध्यावर्णने॥ भित्तौभित्तौ प्रतिफलगतं भालसिंदूरबिंदुं दृष्ट्वा दृष्ट्वा कमलनयना केलिदीपभ्रमेण॥ कां
ते चैलं हरति हरितं लोलमालोकयंती गात्रं प्रच्छादयंती सहसा पाणिपंकेरुहेण॥ इतरेतरक्रियाकौरंगक्रियायाः शीघ्रता वा चपलता॥ मात्सर्य
द्वेषरागादयो विभावाः॥ अनुभावाः वैरिदर्शनवाक्पारुष्यप्रहारादयः॥ यथा॥ लंकाचारिणि सेतुकारिणि रणक्रीडाचमत्कारिणीयोटानंदवचः प्रसारि
णि पुरो रामे धनुर्धन्वति॥ जातास्तस्य दशाननस्य समरप्रारंभसंरंभसुरत्केयूरक्वणिताश्च मयविशिखत्यागाः करश्रेणयः॥ चेतःप्रसादो हर्षः॥ प्रिय
दर्शनपुत्रजननादयो विभावाः॥ अनुभावाः पुलकस्वेदाश्रुस्वरभेदादयः॥ यथा॥ पुलकितकुचकुंभपालिराधा व्रजति मुकुंदमुखेंदुवीक्षणाय॥ विरचयति
न मध्यभंगभीतिं गणयति नापि नितंबगौरवाणि॥ आकस्मिकेष्टानिष्टनिपातविवर्तः॥ संभ्रमो वा वेगः॥ वैरिदर्शनप्रियश्रवणोत्पातादयो विभावाः॥
अनुभावास्त्वराशरीरस्खलनविपर्यासादयः॥ यथा॥ चक्रो वासमसि विश्लथे सहचरीस्कंधे द्वितीयः करः पश्चाद्गच्छति चक्षुरेकमितरद्दूर्णं मुखे भ्राम्य

त०५

राम

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० ता० ८

ति॥एकंठकविस्थमस्तिचरणं निर्गंतुमुत्कंठते चान्यद्वैरिमृगीदृशां रघुपतेरालोकसेनाचरान्॥ सकलव्यवहाराक्षमज्ञानवमाजडता॥ नचमूर्छापस्मारनि
द्रास्वप्नेष्वतिव्याप्तिः॥ तज्ञानविरहाल्लइष्टानिष्टदर्शनाद्यो विभावाः अनुभावा अनवभाषणं निर्निमेषप्रेक्षणोष्णानिश्चयपरिच्छेदः॥यथा॥दुष्पारवारिधि
निपारमुदारवीर्यमागच्छतो हनुमतो हसितं वितेनुः॥ उद्वीक्ष्य नीरनिधितीरमधीरवीचिचित्रार्पिता इव पुनः कपयो बभूवुः॥ आत्मनि सर्वाधिकत्वबुद्धिः
सर्वस्मिन्नधमत्वबुद्धिर्वा गर्वः॥ बलैश्वर्याभिजनलावण्यरूपयो विभावाः॥ अनुभावाः अवज्ञादृष्टिचेष्टितहसितपौरुषप्रकाशाद्यः॥यथा॥परशुरामवाक्यं॥
निःपीतैककुलशोद्भवेन जलधौ गौरीपतेर्गंगया हो लुंठनवपुर्ललाटदहने यावत्प्लुतः प्रक्रमः॥ तावत्तत्र कथा विवक्षनगरीनारीदृशां भारुहहंह प्रस्खलदश्रुवारिपटले
स्पृष्टाः पयोराशयः॥ दुष्टसंशयोऽनिष्टजिज्ञासा वा विषादः॥ इष्टपहेन जीवनधनयशःशरीरपुत्रकलत्राद्यः॥यथा॥ प्रस्थाप्यापदि व्रजामि भवनं वाचां
भवेत्वच्यवो निर्गच्छामि निकुंजमेव यदि वा को वेद किं स्यादिति॥ निष्ठाप्येवय दिक्षु चिह्नं न तदैकिं नालमेतावता मध्ये वर्त्म कलानिधेः समुद्यो जातः किमात
न्यतां॥ औत्सुक्यं कालासहिष्णुता सकलेंद्रियाणामेकैकवक्रियाग्रारं भावा॥ प्रियस्मरणाद्यो विभावाः॥ अनुभावास्तंद्रागात्रगौरवाद्यः॥यथा॥
आद्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुनः मल्लीकेतकचारुचंपकनवांभोजस्रजां गुंफनैः॥ कांचीकुंडलहेमहारवलयन्यासैस्तृतीयस्त्वतो
नीतः सुंदरि वासरस्य चरमो यामः कथं यास्यति॥ इतरहिं द्रियमपहाय मनस्त्वचियदावर्तते तदा निद्रा॥ सुप्तस्य कारणेखो सुप्ताप्राज्निद्रा भरतेनोक्ता
स्वप्नवहनाडिकायां मनो यदा वर्तते तदा स्वप्नसंभवः॥ विभावाः स्वभावचिंतालस्यक्लमाद्यः॥ अनुभावाः पार्श्वकरणनयनभ्रूचलनविभ्रमवचनस्ख
मदर्शनाद्यः॥यथा॥ गच्छन्कुंठं तपनदुहितुः पिच्छपुच्छावतंसः पश्यन्नस्मद्वदनमसकृच्चक्षुषा कुंचितेन स्निग्धापांगः शिथिलचरणः स्तोकविस्पष्टहास

राम

८

प्रे

स्वप्नेदृष्टः कमलकलिकामंडनो मेघखंडः॥ ग्रहाद्यावेशोपस्मारः॥ तत्र विभावाः अपावित्र्यशून्यस्थितिधातुवैशम्योक्तदुःखभयाद्यः॥ अनुभावाः॥
कंपफेननिःश्वासभूनिपातविपर्यासजिह्वालोलनाद्यः॥ यथा॥ उद्वेल्लन्नवपल्लवाधररुचः पर्यस्तशाखाभुजाः स्फूर्जत्कोरकफेनबिंदुपटलव्या
कीर्णा देहश्रियः॥ भ्राम्यभ्रंगकलापकुंतलजुषः श्वासानिलोत्कंपिताः शैलं वीक्ष्य कपेर्निपातितमपस्मारं दधुर्भूरुहाः॥ मूर्छाप्यत्रैवांतर्भवति॥ त्वच
मपि विहाय यदा मनः पुरीतति वर्तते तदा सुप्तं॥ निद्रा विभावाः॥ अनुभावा नेत्रमीलनप्रलापश्वासोछ्वासाद्यः॥ यथा स्वासोछ्वासप्रचलदधरोपां
त्तमामीलिताक्षं क्रीडाकुंजे तपनदुहितुः सुप्तः श्रीमुरारेः॥ अतः स्मेरं निभृतनिभृतं कापि कर्णावतंसं काचिद्बाहोः कनकवलयं दाम मुष्णाति काचित्॥
इंद्रियाणां प्रथमप्रकाशो विबोधः॥ निद्राछेदो विभावः॥ अनुभावा अंगाकृष्टिजृंभाक्षिमर्दनांगुलिमोटनाद्यः॥ यथा राधायाः सहसादृशाकुवलयद्रोणी
दरिद्रं नभः कुर्वंस्याः कलकंठकंठनिनदैः सांकेतिकैर्जाग्रतः अंगाकृष्टिविवर्तमानवपुषो देवस्य कंसद्विषो लोलापांगतरंगभंगचतुरं नेत्रांबुजं पातु नः॥ पराहं
कारप्रशमोत्कटसमीहामर्षः॥ विभावाः अवमाननाधिक्षेपाद्यः॥ अनुभावाः स्वेदशिरःकंपनयनारुण्याद्यः॥ यथा॥ अद्याप्यनेन भर्तुः स्मरसिजनमनास्तु
सेनासमेतं बध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयाम॥ शाखामृगावलोकप्रचलनयनया सीतया साकमेनां लंकामुत्पाट्य किं वा रघुपतिचरणांभोजयो
र्योजयाम॥ आकारव्यवहारसंगोपनमवहित्थं विभावाः॥ व्रीडाधार्ष्ट्यकौटिल्यगौरवाद्यः॥ अनुभावाः अन्यथाकरणमन्यथाप्रेक्षणमन्यथाकथनाद्यः॥ यथा॥
सकसमविभीषणः सगरबान्बद्धः सपाथोनिधिः किंचित्क्रुध्यति सोपि सारणलः सीतापरित्यज्यतां॥ दूत्यां क्व्यसुहृद्रूणस्य वचनं स्मेराननो रावणो मुक्तादामकरे
णकंटकविधेः कीरस्य विन्यस्यति॥ उग्रता निर्दयता॥ विभावाः अपराधदोषकीर्तननचौर्याद्यः॥ अनुभावाः तर्जनताडनाद्यः॥ यथा॥ कोदंडं रणभिक्षुभ्र

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० नं०
१

पतिभुजादंडेप्रचंडैः छलंतत्र ज्याप्रतिपक्षराजरमणीवेणीगुणैर्गुंफिताक्रूराकारकुठारतारतपनप्रभ्रष्टकुष्टद्विपत्रुट्यद्दंतलैः छलोत्लिविशिरवोस्तलक्ष्यमु
ह्वीक्ष्यते ॥ यथार्थज्ञानंमतिः तत्रविभावाः शास्त्रचिंतनादयः ॥ अनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनचातुर्यादयः ॥ यथा ॥ लाटीनेत्रपुटीपयोधरघ
टीश्रीकुटीरोरुतटीपाटीरद्रववर्णनेनकविभिर्मूढैर्दिनं नीयते ॥ गोविंदेतिजनार्दनेतिजगतीनाथेतिकृष्णेतिचव्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति ॥
नयविनयानुनयोपदेशोपालंभास्तत्रैवांतर्भवंति ॥ उपदेशोयथा ॥ वसुप्रदेयं रलतो वधेयं मनोनिधेयं चरणे हरस्य ॥ निजं विधेयं कृतिभिर्विधेयं विधेर्विधेयं
विधिरेव वेत्ति ॥ उपालंभोद्विविधः ॥ प्रणयात्मकोपात्मा च ॥ प्रणयात्माया यथा ॥ पाषाणेयदिमार्दवं यदिपयोधाराहुताशोदरे व्यालीनां च दृग्सुधा यदि रवे गर्भे हि
मानीयदि ॥ स्तुमाकिंचसमीरणे यदि तदा स्वप्नेभवेत्सत्यता किं नाम स्मरभूमिपाल भगवन्क्रोधान्मुधाधावसि ॥ कोपात्मामर्षएवांतर्भवति ॥ यथा जनय
सिजगदेव देवदेवाभरणसुधारसशीतलं सुधांशो ॥ उरसिवहसिमेतथापिताप यदुपतिवत्कसखासि किं ब्रवीमि ॥ ज्वरादिविकारो व्याधिः ॥ कुपितधातुकाम
क्लेशादयो विभावाः ॥ अनुभावाः दृशोपद्रवाः ॥ यथा ॥ दातुं क्षीयमनर्घ्यदीधितिपदं तस्याः कुरंगीदृशः केयूरं कनकांगुलीयकमिवानेतुं बहिर्गच्छति ॥ अ
न्यत्स्रस्तनिवेदयामि किमिति गोवेणीमिषात्कालियोदृष्ट्वा लोचनवारिकालियसरोभ्रांत्याय परिभ्राम्यति ॥ विनाविचारमाचार उन्मादः ॥ त्यागस्यागमने
तिव्याप्तिः ॥ विनाविचारमिति यदृच्छवारणात् ॥ तत्स्वसुखेदुःखेदृश्यंतदृशोविचार एव ॥ क्रियानसमीचीनेत्यन्यदेतत् ॥ अपेक्ष्यकारिक्रियोन्माद इति यस्यमते
तत्रेदंदूषणं ॥ तत्रविभावाः प्रियावियोगविभवभ्रंशादयः ॥ अनुभावाः प्रलपितव्यारोदनादयः ॥ यथा नैषा कापिचकांतिकाञ्चनुलता सैवालिभयाधि
कापद्मानेत्रकुतोपिजल्पतितदासंमूर्छितावर्तते ॥ द्रुहुंहंतविचिंत्यसिंचतिमुहुर्नीरैरधीरैरीशोर्यातंबालतुलेकरेणक्षुजयेराधापसंभाष्यते ॥ प्राणनिष्क्र

रास
१

मणंमरणं ॥ विभावानुभावौस्फुटौ ॥ यथा पर्यस्तांघ्रिविवर्णवाहुपततः संग्रामभूमौभिपालंकेशसनकेशपाशमनिलप्लुष्टंसमाकांक्षति ॥ उष्मं नोष्मकरः क
रं किरतिवा वक्त्रारविंदेनवा स्वेस्वेधाम्निमिथः कथामपिसुराः श्रव्यक्रमां तन्वते ॥ मनोविक्षोभस्त्रासः ॥ तथा च विचारो क्षोभमनो विक्षोभोध्भीतिरात्कस्मिकमनः क्षो
भस्त्रासइति विक्षोभेणोवद्व्यारे, त्वेन परिग्रहः ॥ तत्रविभावाः घोरस्वनश्रवणघोरसत्वदर्शनादयः ॥ अनुभावास्तंभस्वेदरोमांचगात्रतापादयः ॥ यथा ॥ भण्वा
नोहरिनामरामवह्नाद्विड्स शंकांवहन्कुर्वन्कातरमांतरंसभगवान्मैनाकभूमीधरः कुंचत्पक्षतिभुग्निलष्टुतिकृतप्रत्यंगचोलावृतिस्सत्कृत्याद्दतिसिंधुरा
जकुहरेनिर्मकुमारांकृते ॥ विचारोवितर्कः ॥ विभावाविप्रतिपत्तिसंशयसाधकबाधकमानसमुद्भावनादयः ॥ अनुभावाः ॥ शिरकंपभ्रूचालनादयः ॥ वि
तर्कश्चतुर्विधः ॥ विचारात्मासंशयात्माउअनध्यवसायात्माविप्रतिपत्त्यात्माचेति ॥ अनध्यवसायउत्कटकोटिकः संशयः ॥ यथा ॥ कालिंदीविलुठत्क
ठोरकमठक्रूरंधनुः शांभवंरामोबाणमृणालकोमलवपुर्वंशावतंसोभुवः ॥ व्याहारप्रवराः खलाक्षितिभृतांगोष्ठीगरिष्ठा पुरस्तस्मात्केवलमेषतिष्ठतिम
मश्रेयस्कोभास्कर ॥ यथा ॥ सौंदर्यस्यमनोभवेन गणनारेखाकिमेषाकृतालावण्यस्यविलोकितुंत्रिजगतीमेषाकिमुद्दीपिका ॥ आनंदद्रुममंजरीनय
नयोः किंवासमुज्जृंभतेराधायाः किमुवास्वभावसुभगारोमालिरुन्मीलति ॥ यथा वा ॥ कथयकथयकेयं खंजनंलेखयंती विहरतियमुनायाः पाथसि
स्वर्णवल्लिः ॥ अयमुदयतिकोवागारदः शीतभानुः नहुपरितिमिराणामेषकोवाविवर्तः ॥ यथा वा ॥ इयं न विलसत्सुधाकरकलाधिकाराधिकाकरंबि
रणमालिनः किमुसहेतनस्याश्वपुः ॥ नवाफलकमंजरी वहतिखंजरीटंयतस्ततस्स्मरमरालसाकथयकेयमुन्मीलति ॥ ननुदशावरुद्धाखभिलाषगु
णकथाप्रलापाव्यभिचारिभावाभ्यंतरेनगणितास्तकिंत्वत्रैवतेसंतीतिचेन्न ॥ औत्सुक्येभिलाषस्यवर्णनात्मकस्मृतोगुणकथायाउन्मादेप्रलाप

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यांतर्भावात् ॥ अत्रप्रतिभाति ॥ छलमधिकोव्यभिचारिभावइति ॥ तांबूलाहरणछलेनरभसाश्लेषोपिसंविध्धिनइतिशृंगारेदर्शनात् ॥ रौद्रेचेंद्रजालाद
यः ॥ हास्येचव्यपदेशान्यापदेशयोर्दर्शनात् ॥ वीथीभेदेनगणनाच्च ॥ संगुप्तक्रियासंपादनंछलं ॥ विभावाभवमानप्रतिपक्षकुचेष्टादयः ॥ अनु
भावावक्रोक्तिनिभृतवीक्षणभ्रूविप्रेक्षादनादयः ॥ शृंगारेयथा ॥ संकेतीकृतकाननंप्रविशतोरन्योन्यकौतूहलाद्न्यूलप्रतिभानमारचयतोरन्योन्य
मुत्कस्मितोकुंचत्कायमितस्ततः क्लिसलयैरात्मानमाछ्वतोराधामाधवयोर्निकुंजकुहराद्दूतीविकापातुनः ॥ संग्रामेयथा ॥ सप्तापिकुत्सान्युपकंठ
राशीन्पुरोपकंठेपुनरीक्षमाणः ॥ द्रोणोद्भपींद्रस्यमुखेसरवेदमायोजयामाससरामचंद्रः ॥ सर्वाणिव्यभिचारिस्तुलानिविस्तरभियानोदाहृतानि
आलस्योजुगुप्सासंभोगोवर्ज्यः ॥ विप्रलंभेआलस्यग्लानिनिर्वेदश्रमशंकानिद्रोत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूयाव्यभिचा
रिणः ॥ हास्येऽवहित्थालस्यसुप्तनिद्राप्रबोधाव्य० ॥ करुणेमोहनिर्वेददैन्यजाड्यविषादश्रमापस्मारोन्मादव्यथालस्यस्मृतिवैपथुस्तंभस्वर
भेदाश्रूणिव्य० ॥ रौद्रेउत्साहस्मृतिस्वेदावेगामर्षरोमांचचंचलतोग्रतास्वरभेदकंपाव्य० ॥ वीरेउत्साहधृतिमतिगर्वावेगामर्षौग्र्यरोमांचाव्य०
भयेस्तंभस्वेदगद्गदतारोमांचवैवर्ण्यशंकामोहावेगदैन्यचापलत्रासापस्मारप्रलयमूर्छाव्य० ॥ वीभत्सेपस्मारमोहावेगवैवर्ण्यानिव्य० ॥ अद्भुते
स्तंभस्वेदगद्गदताश्रुरोमांचविभ्रम व्य० ॥ अन्येचभावारसानुकूलास्तयमूहयाः स्थायिनोपिव्यभिचरंति ॥ हासः शृंगारे रतिः शांतकरुणे
हास्येषु ॥ क्रोधोवीरे ॥ भयंशोकश्शृंगारयोर्जुगुप्साभयानकेउत्साहविस्मयौसर्वरसेषु ॥ इतिश्रीभानुदत्तमिश्रविरचितायांरसतरंगिण्यांव्य
भिचारिभावनिरूपणंनामपंचमस्तरंगः ॥ अथरसानिरूप्यंते ॥ विभावानुभावसात्विकभावव्यभिचारिभावैरुपनीयमानः ॥ परिपूर्णस्था

राम
१०

यिभावोरस्यमानोरसः ॥ भावविभावानुभावव्यभिचारिभावैर्मनोविश्रामोपत्रक्रियतेसवारसः ॥ प्रबुद्धस्थायिभाववासनावारसः ॥ प्रबोधकावि
भावानुभावव्यभिचारिभावाः ॥ नचयूनोःप्रथमानुरागेऽव्याप्तिः ॥ पूर्वानुभवाभावादितिवाच्यं ॥ तत्रापिजन्मांतरीयानुभवसत्वादिति ॥ सचरसोद्वि
विधः ॥ लौकिकोऽलौकिकश्चेति ॥ लौकिकसन्निकर्षजन्मालौकिकः ॥ अलौकिकसन्निकर्षजन्मात्वलौकिकः ॥ लौकिकः सन्निकर्षःषोढाविषय
गतः ॥ अलौकिकसन्निकर्षोज्ञानंतेषुचानुभूतेषुसाक्षात्कारेतज्जन्मान नुभूतेषुप्राक्तनसंस्कारद्वाराज्ञानमेवप्रत्यासत्ति ॥ अलौकिकोरसस्त्रिधा ॥
स्वाप्निकोमानोरथिकऔपनायिकश्चेति ॥ औपनायिकश्चकाव्यपदपदार्थचमत्कारे ॥ नाट्येच ॥ किंतुद्वयोरप्यानंदरूपता ॥ ननुमानोरथिकोर
सोनप्रसिद्धइतिचेत् ॥ सत्यं ॥ अस्माकंतुमनोरथोपरचितप्राप्तस्वाधीनतटक्रीडाकाननकेलिकौतुकजुषामायुःपरक्षीयतइत्यादौमानोरथिक
शृंगारस्रवणात् ॥ शास्त्रेसुखस्यनैविध्यगणनात्तुरसेनविनाचसुखानुत्पत्तिरिति ॥ तत्रविशेषाः यदाहभरतः ॥ शृंगारहास्यकरुणरौद्रवीरभ
यानकाः ॥ वीभत्साद्भुतसंज्ञौचनाट्येचाष्टौरसाःस्मृताः ॥ सकलाधिदैवतंविष्णुःसचशृंगारस्याधिदैवतं ॥ तेनसकलाकांक्षाविषयत्वेनाराध्यतया
चप्रथमंशृंगारोपन्यासः ॥ ननुवात्सल्यंलौल्यंभक्तिःकार्पण्यंवाकथंवानरसाः ॥ आर्द्रताभिलाषश्रद्धास्पृहाणांस्थायिभावानांतत्रसत्वादिति
चेन्न ॥ तेषांव्यभिचारित्वात्मकत्वात् ॥ ननुकस्यरसस्यतेव्यभिचारिभावाभवेयुरितिचेत्सत्यं ॥ वात्सल्येकरुणएवसरः ॥ लौल्येहास्यः भक्तौशां
तः ॥ कार्पण्येहास्यः ॥ नन्वेवंपरत्रकुप्तत्वात्त्रयव्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातोधर्मकल्पनायालघुत्वाच्च ॥ व्यभिचारिणिरतिरेवास्तुकिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करुणेनेति चेन्न ॥ रतेः शोक इति शोककारणतायां रतेरुपक्षयात् ॥ किंच रतेः कस्य रसस्य व्यभिचारित्वं ॥ नशृंगारहास्यवीररौद्राणां ॥ युवमिथु
न परस्परप्रीतिहासक्रोधानंदानां तत्राभावात् ॥ न बीभत्सस्य ॥ जुगुप्सायास्तत्राभावात् ॥ नाप्यद्भुतस्य ॥ विस्मयस्यापि तत्रास्थिरत्वात् ॥ तस्माच्छोक
स्य स्थायिनया स्थायिशोकभावकः ॥ करुणो रत्यतिरिक्तो रस इति ॥ ननु रतिरेवास्तु किं हास्येनेति चेत्सकस्यास्तु व्यभिचारी ॥ करुणरौद्रवीरभ
यानकबीभत्सानां तत्रानवकाशात् ॥ नाप्यद्भुतस्य ॥ विस्मयस्य तत्रास्थिरत्वात् ॥ न शृंगारस्य रतेः स्थायित्वाभावात् ॥ परंतु रत्या सह हास्यस्य सा
कर्यं ॥ ननु रतिहास्ययोरसंकीर्णत्वं उत्साभावात्स्थपक्षे कथं स्यादिति चेन्न ॥ हेतोरसाधारण्यात् ॥ असाधारण्यमत्र स्थायित्वं ॥ यथा रतिसांकर्ये
पि स्थायिशोकोऽसाधारणत्वात्कारणात्करुणोऽभिधीयते यथा तत्सांकर्येपि स्थायिहासभावासाधारणत्वात्कारणात्हास्योऽभिधीयते ॥ शांतेप्येवम
त्युं ॥ न च वात्सल्यादावप्यसाधारणहेतुकआर्द्रतादयः ॥ संत्येवेति तेषामपि रसत्वापत्तिरिति वाच्यं ॥ आर्द्रतादीनामपरिमितत्वात् ॥ तस्याश्च तत्रा
साधारण्ये शृंगाररसत्वापत्तिः ॥ ननूत्साहक्रोधावुभयत्र ॥ तस्माद्वीररौद्रयोरन्यतर एव रसो वर्ततामिति चेन्न ॥ स्थायिभेदेन भेदात् ॥ उत्साहवासनावीरे
ननु रौद्रे क्रोधवासनारौद्रेन पृथ्वी र इति ॥ पूर्णः परस्परं परिपूर्णः प्रमोदः सम्यक् परिपूर्णो रतिभावो वा शृंगाररसः ॥ पूर्णोरेकस्य प्रमोदरत्योराधिक्ये
न्यूनतायां वातिरेके वा परिपूर्णरसाभावाद्रसाभास इति ॥ स च द्विविधः ॥ संभोगो विप्रलंभश्चेति ॥ तत्र दर्शनस्पर्शनसंलापाभिरितरेतरमनुभूयमानं सुरतं
परस्परसंयोगे नोत्पद्यमान आनंदो वा संभोगः ॥ संयोगो बहिरिंद्रियसंबंधः ॥ अस्पष्टैव तं विष्णुः ॥ वर्णश्यामः ॥ यथ ॥ क्षोभेन चाटु वचनानि परा

हतानि पाणिः पयोधरयतोऽजडतां जगाम ॥ लक्ष्म्याः परंतु पृथुवेपथुरेव नीवीं विस्रंसयन्सुहृदभून्मधुसूदनस्य ॥ यथा ॥ निद्राणेक्षणसंभ्रमप्यवदनं कांते
कुचांतस्पृशि स्रस्तव्यस्तदुकूलदर्शितवलिप्रव्यक्तनाभिश्रियः ॥ राधायास्तद्घूर्णदुत्पलदलद्रोणीमदद्रोहिभिः दृक्कोणस्यतरंगितैर्विरचितो दीर्घा
युरेव स्मरः ॥ देशानां समयानां नायिकानां च भेदेन नायकयोरवस्थाभेदेन च बहलो भेदास्ते च रसमंजर्यां विशेषतो दर्शिताः इह पुनर्विस्तरभिया न प्र
दर्शित इति ॥ अथ हावा निरूप्यंते ॥ तत्र भरतः ॥ लीलाविलासो विच्छित्तिर्विभ्रमः किलकिंचितं ॥ मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥ विहृतं चे
ति विज्ञेया दश हावास्तु योषितां ॥ नारीणां शृंगारचेष्टाः ॥ स च स्वभावजो नारीणां ॥ ननु विब्बोकविलासविच्छित्तिविभ्रमाः ॥ पुरुषाणामपि संभवंतीति
चेत् ॥ सत्यं ॥ तेषां लौपाधिकाः ॥ स्वाभाविकाः स्त्रीणामेव ॥ ननु चेवं यदि तासां सदैव ते कथं न संभवंतीति चेत् ॥ सत्यं ॥ उद्दीपकान्वयव्यतिरेकाभ्यां नायिका
नां हावाविर्भावतिरोभावाविति ॥ लीलाविलासविच्छित्तिविभ्रमललितानि शारीराणि ॥ मोट्टायितकुट्टमितविब्बोकविहृतानि चांतराणि ॥ किलकिंचितमु
भयसंकीर्णमिति ॥ प्रियभूषणवचनाद्यनुकृतिर्लीला ॥ तत्र विभावः ॥ सखीकौतुकलापः ॥ अनुभावः ॥ प्रियपरिहासः ॥ यथा ॥ चंडीशोचरमाद्रि
विनिमनो जिज्ञासितुं सुभ्रुवान्यं च स्वकौतुकया तयाविरचिते वंशीरवे राधया ॥ एष स्फूर्जति कस्वनिस्वन इति क्रोधाद्रुजन्काननं राधां वीक्ष्य लभतान पिहि
तांस्मेरो हरिः पातु वः ॥ गमननयनभ्रूसंभृतीनां यत्कश्चिदुत्पद्यते विशेषः स विलासः तत्र विभावः ॥ प्रियदर्शनस्मरणादयः ॥ अनुभावाः ॥ अभिला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षवैदग्ध्यप्रकाशनसंकेतप्रीतिप्रकटनादयः॥ यथा॥ कूजत्कांचिररस्फुरद्वलिनटद्भूवल्लिवेल्लद्दृशुः र्वल्गत्कुंडलकांतिसाचिवलितग्रीवंलपंत्याक्षवः॥
प्रातर्नर्तितपुंडरीकपरिषत्सांडित्यपाटच्चरीदृष्टिर्यं प्रतिजायते वरतनोर्वक्त्रा सशाङ्काधिकः॥ कतिपयभूषणविन्यासो विछित्तिः॥ तत्रविभावाः॥ सौ
कुमार्य्यप्रियसौभाग्यसौंदर्य्यगर्वक्रोधक्लेशादयः॥ अनुभावाः॥ गर्वमानक्लेशप्रकाशनादयः॥ यथा॥ केयूरंनकेयूरेणहेनकटकं मौलौनमालापुनः॥
कस्तूरीतिलकंतथापिलनुते संसारसारांश्रियं॥ सर्वाधिकप्रमलेरविभालफलकेयद्वेधसासुभ्रुवोजानीमः किमुतत्र मन्मथमहीपालेनमुद्राकृत॥
वागंगभूषणानांस्थानविपर्यासो विभ्रमः॥ तत्रविभावाः॥ धनमदरागौत्सुक्यादयः॥ अनुभावाः॥ प्रियसख्याद्युपहासादयः॥ यथासक्ते केलिवि
धौतंनिजांशुकधियापीतांबरस्यांशुकं पप्रायाः परिधाय सप्रशयनात्थातः प्रयांत्याबहिः॥ आघ्रातुंवसनांचलंचलंपलयन्कोपंदृशादर्शयन्नृभावा
कौतुकमाचरन्स्मितसुधास्निग्धो हरिः पातु नः॥ श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानांसंकरः॥ किलकिंचितं॥ तद्यथा॥ श्रमाभिलाषगर्वोत्थां
स्मितहर्षभयक्रुधां॥ असकृत्संकरः प्रीशैर्विज्ञेयं किलकिंचितमिति॥ अत्र विभावाः॥ नवयौवनोद्रेकचांचल्यादयः॥ अनुभावाः॥ कर्तव्यानिर्धार
णादयः॥ यथा॥ कोदंडमारेहनिचंडिमानं मधुव्रतः कांक्षतिरोगिणिमानं॥ पप्रंसुधांवर्षतिवेपमानं स्वरणाचलः स्विद्यतिकिंविदानं॥ यथावा॥
क्रोधामारसमुत्थिताः समुत्थसंत्रासशैलार्हिता ब्रीडाभिः परिमर्दिता स्मितसुधाधाराभिरुद्वर्तिता॥ स्नातास्नेहरसैर्मनोभवकलामालाभिराभूषि
ताः पायासुर्मयिशैलराजदुहितुः स्फीताः कटाक्षच्छटाः॥ वार्ता वैमुख्ये सतिनिभ्नतभ्यो दर्शनस्पृहामोद्दीपितं॥ अत्र विभावाः॥ सपत्नीप्रासल

राम० १२

क

ज्जादयः॥ अनुभावाः॥ मनःप्रेमैथनसंकेतनिवेदनादयः॥ यथा॥ गलेहस्यकथारसंकथमपिश्रोतुंसमुत्कंठनेराधाकिंतुविकीर्य्यरत्नकपटागत्यसौधाद्
हिः॥ नत्यन्नेत्रपुटीस्फुरत्कुचघटीस्वेदोल्लसद्दोसाटिव्यावल्गद्भ्रुकुटिस्खलत्पदिपुनः कृष्णांतिकेभ्राम्यति॥ सुखेदुःखचेष्टाकुट्टमितं॥ तत्रविभावाः॥
रागौत्सुक्यदर्शनकचग्रहतकुंतलाधरग्रहणादयः॥ अनुभावाः॥ कपटकायसंकोचकपटसीत्कारादयः॥ यथा॥ रोद्धुंपाणिः प्रचलतिचिराद्वंतुलिन्निंश्व
लासोभ्रूविक्षेपोभवतिकुटिलोनेत्रमंतःप्रसन्नं॥ गाढाश्लेषेजपतिसुतनोरर्धमात्रोनश्वरः कंपोभ्रूः प्रसरतिसुखंसैदुखंनभयाति॥ गर्वाभिमानसंभू
तोविकारोनादरात्मा बिब्बोकः॥ अत्र विभावाः॥ यौवनमदधनमदकुलमदप्रियापराधादयः॥ अनुभावाः॥ अवहित्थदुर्वचनदुःप्रेक्षणादयः॥ यथा॥
कृतांजलिःकातरधीर्निपातः प्राणेश्वरः पार्श्वमुपाजगाम॥ तत्वीसुखेकुंडलरत्नरेखामेषापुनःप्रेक्षितुमाचकांक्ष॥ सकलांगसमीचीनविन्यासोल
लितं॥ अत्रैवस्मितादयोंतर्भवंति॥ तत्र विभावाः॥ मनःप्रसादप्रियतमदृगनुरागधीरत्वादयः॥ अनुभावाः॥ प्रियवशीकरणलोकानुरागचमत्का
रादयः॥ यथा॥ कलक्कणितमेखलचपलचारुनेत्रांचलंप्रसन्नमुखमंडलंश्रवणसंचरत्कुंडलं॥ स्फुरत्सुलकबंधुरंलपितरागभमानाधरंपिब
स्यरतिमंदिरंव्रजतिकस्यशातोदरी॥ प्रियसंनिधावभिलाषापरिपूर्तिर्विहृतं॥ तत्रव्याजलज्जादयोविभावाः॥ अनुभावाः॥ अन्यथा
चेष्टितान्यथाव्यवहारादयः॥ व्याजाद्यथा॥ अभिलषतिकपोलेचंद्रचूडेविधातुंतिलकमुरस्यदंतः कोपभाजाभवान्या॥ फणिपतिभयक
टाटंगमुत्कंपयंत्याप्रचलवसनवातैर्विध्मिताः केलिदीपाः॥ लज्जातोयथा॥ आनंदभाजोयदुनंदनस्यकरावरोधंनकरेणकुर्या॥ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसतरं गिणी० १३

स्वींलपंतीमितिसंजघान च कोरनेत्राचुलकोत्केन ॥ यन्नोरन्योन्यंमुद्रितानांपंचेंद्रियाणांसंबंधाभावोभीष्टानिर्वा विप्रलंभः ॥ न च मानात्म
केविप्रलंभेव्याप्तिरितिवाच्यं ॥ मुद्रितपंचेंद्रियसंबंधाभावरूपस्यविशिष्टाभावस्यतत्रापिसत्वात् ॥ तदानीयूनोरिंद्रियाणांमुद्रितत्वाभावात् ॥
नतुपाश्रियमभिसरतिसाविप्रयुक्ताभवेदितिचेत् ॥ सत्यं ॥ साविप्रयुक्तैव ॥ अचिरदर्शनप्रत्याशानुकेनप्रमोदेन विरुद्धधर्मस्याशुपातादेरसंभवइ
ति ॥ स च विप्रलंभः पंचधा ॥ देशांतरगमनाद्गुरुनिदेशादभिलाषादीर्ष्यायाः शापाच्चेति ॥ समयाद्दैवाद्विदूरादित्यारयोप्यनेयाः ॥ देशांतरगमना
द्यथा ॥ प्रस्थानायकृतोद्यमे प्रियतमे दोःकंकणेनच्युतं धैर्येण स्खलितं मदेन गलितं नेत्राभसानिःसृतं ॥ जीवेनापिपियियासुना शिव शिव प्रारभि
वामभ्रुवः कंपांदोलितकिंकिणीकलरवव्याजेन वैन्यस्मृतिः ॥ यथा ताल चर त्रानां ॥ वीणामंके कथमपिसखीप्रार्थनाभिनिंधाय स्वैरंस्वैरंसरसि
जदृशागातुमारब्धमेव ॥ तंत्रीवुध्याकिमपिविरहक्षीणहीनांगवल्ली मेनामेवस्पृशतिबहुशो मूर्छनाचित्रमेतत् ॥ गुरुनिदेशाद्यथा ॥ भालाभूमन
स्तुर्युरूर्मनसिजः कोप्येषभृंगस्तनो मंदोगंधवहः सितो मलयजोदोषाकरो माधवैः ॥ अंगारोनवपल्लवः परभृतो विज्ञो गुरोराज्ञयानियातो
सिविचारिताः कथममीक्रूराः ग्रहान्तस्या ॥ अभिलाषाद्यथा ॥ आगाराभिमुखंमुखं रचयतो वक्रीकृतग्रीवयोर्व्यस्तंचोलमजानतो क्वचिदपिव्याजा
स्पुनस्तिष्ठतोमार्गं विस्मरतो पुनः क्वचिदपिस्यक्ताक्षरं जल्पतोः ॥ सावित्रेक्षितमावयोर्यदभवत् भूयस्तदाशास्महे ॥ ईर्ष्यातोयथा ॥ प्राणेशस्यमभ
वतिमनः प्रेमहेमप्रसूनं चेतश्चूतं दृगपिकमलं जीवनं बंधुजीवं ॥ आशास्त्रे प्रथितमखिलं वैधसात्स्यभंगे स्यादेतेषामपिनिपतनं चंडिमानं राम० १३

विमुंच ॥ शापाद्यथा ॥ अन्यत्र यादिनिर्गंतु मिच्छा निर्गच्छ दूरतः ॥ प्रियाविरहतापेन शापदग्धो भविष्यसि ॥ समयाद्यथा ॥ विश्लेषजीवनप्रीडापीडाविधुर
मानसा ॥ तस्थौ प्रातः प्रियंप्रेक्ष चक्रीव क्रांकितानना ॥ दैवाद्यथा ॥ जीवनेसतिविश्लेषाक्लेशेसतिजीवनं ॥ द्वयोरप्यनयोर्भूनोमहमेवनिदर्शनं ॥ विदूराद्य
था ॥ केलीगृहेवामणिमंदिरेवाशरामलंकानगरेहुताशनः ॥ इतस्ततः प्रस्थितयोर्नयूनोर्वियोगजन्माविरलंभवह्निः ॥ इति श्रीभानुदत्तमिश्रविरचिता
यां रसतरंगिण्यां रसनिरूपणं नाम षष्ठस्तरंगः ॥ ॥ हासस्यपरिपोषोहास्यः ॥ वर्णोस्यशुक्लोदैवतप्रथमः ॥ स च द्विविधः स्वनिष्ठः परनिष्ठश्चेति ॥
तावप्युत्तममध्यमाधमभेदास्त्रिधेतिषड्विधोभवतः ॥ स्वनिष्ठोपिषड्विधः ॥ परनिष्ठोपिषड्विधइतिद्वादशविधोहास्यः ॥ तथाहि ॥ उत्तमानांस्वनिष्ठप
रनिष्ठे च स्मितहसिते ॥ मध्यमानांस्वनिष्ठेपरनिष्ठे च विहसितोपहसिते ॥ अधमानांस्वनिष्ठेपरनिष्ठेचापहसितातिहसिते ॥ उत्तमानामीषत्कपो द्विकसित
लमध्यकदर्शनमपांगसुकुंचीक्षितं स्मितं ॥ उत्फुल्लकपोलं किंचिल्लक्षितदशनं हसितं ॥ मध्यमानां समयोचितमुत्तमस्वनमाकुंचितमुखमाचिभूतुवदनरागं
विहसितं ॥ उत्फुल्लनासापुटं कुटिलवीक्षितं कुंचितग्रीवं स्फुटस्वनमुपहसितं ॥ अधमानां सुखमुपधस्त्युकंपितमौलि स्फुटवरस्वनमपहसितं ॥ अत्युत्थितं बहुलाश्रु
स्फुटमस्वनमाश्लिष्टपार्श्वजनमारब्धकरतलमतिहसितं ॥ स्वनिष्ठस्मितं यथा ॥ लेखनीमितइतोविलोकयन् कुत्रकुत्रनगामपद्भूः ॥ तांपुनः श्रवणसीम्निलेखि
तांप्रा सम्भ्रमुखस्मितंदधौ ॥ स्वनिष्ठहसितं यथा ॥ रोमांकुरंव्योमगतंरदाग्रस्पृग्धुतिस्वीयमुदीक्ष्यविष्णोः ॥ यद्धासहासंकिमुनप्रयोधावद्यापिफेनस्तवकाय
मानं ॥ परनिष्ठस्मितं यथा ॥ दूरवृषभमुखेरखेलमाजवतिसुवर्णसुवर्णकांतिपर्णे ॥ दृशिभुजगपतेः शिशुः षडास्यः कलयतिकुज्जलमंतिके भवान्याः ॥ परनिष्ठं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विहसितंयथा॥ निशासुतेलस्यधियागृहीतैर्मशीजलैर्लिप्तमुखारविंदं॥ गोपंप्रभातेस्खलदश्रुनीरमधीरनादंजहसुस्तरुण्यः॥ परनिष्ठमुपहसितंयथा
योनिरोधोमञ्जारश्रुइतिपठ्यपन्युनः॥शम्भुर्दुकूलनासेनेतटस्थेनोपहस्यते॥परनिष्ठमपहसितंयथा॥रतोत्सवेवल्लभयत्नसत्त्रंकंठावलग्नंपरिमो
चयंती॥ह्रिजांगनांदीर्घतरंभ्रुसंतीमारस्वनंवारवधूर्जहास॥परनिष्ठमतिहसितंयथा॥चोरःकामरिपोर्गृहंनिशिगतःभूलंकपालंहरन्बीजंधूर्त
फलस्यतंडुलेधियानीत्वापुनर्भुक्तवान्॥व्यावृत्तान्प्रचलन्मुखलपरीपतन्मुख्यविघूर्णन्मुसन्नद्धाद्दध्वनिर्मुक्तमौलिकुसुमस्वर्वेश्यपाहस्यते॥शोक
स्यपरिपोषःकरुणः आशाविच्छेदसातिसर्वेंद्रियक्लमोवाकरुणः॥नचविप्रलंभेतिव्याप्तिः॥तत्रेच्छारायासत्वात्॥तद्विच्छेदस्तुसविप्रलंभःकरुण
एव॥शोकोदुःखंवर्णोस्यकपोतपित्रिनः॥देवतंवरुणःसचस्वनिष्ठःपरनिष्ठश्च॥स्वशापबंधनक्लेशानिष्ठैर्विभावैस्वनिष्ठः॥परेष्टःनाराशापबंधनक्लेशादी
नांदर्शनस्मरणैर्विभावैःपरनिष्ठः॥स्वनिष्ठोयथा॥तवनाथशरःशरासनंतवदेहेभसहेभसात्॥अहमस्मिनतःप्रतीपतेलवनास्मीलितकिंतुच्यनामितः॥
परनिष्ठोयथा॥अनुवनमनुयांतंबाष्पपारित्यजंतंमद्विलकमलदामक्षाममालोच्यरामं॥दिनमपिरविरोविस्तापमंतःप्रसृतेरणनिरिपिधत्तेनारकाबाष्प
विद्वन्॥पूर्णपूर्णःक्रोधोरौद्रः॥सर्वेंद्रियाणांमोधस्त्वंवा॥वर्णोस्यरक्तोदैवतंरुद्रः॥यथा॥चंडांशुःकिंप्रचक्रंभुजगपतिरसौवर्त्तरेवानपाशःकुंताःकिंदंति
दंताःनचगिरिरिशनिःकिंभक्तास्त्रेःकिमन्यैः॥भीमोहंदुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडःप्रस्थावत्तश्रोकोपप्रलयपटुतवहोनास्तिकस्यापि
वरयः॥यथावा॥क्रीडेत्तुंगतुरंगटापपटलीखर्वीकृतोर्वीधरःश्रेणीस्फूर्जितधूलिधोरणिभ्रमस्तोमावलीढंजगत्॥वध्यस्फर्धकरींद्रदंडचरणव्या
भुजनभोगीश्वरव्यग्रोद्ग्रफणाग्ररलरुचिभिर्विद्योतयामोवयं॥परिपूर्णउत्साहःसर्वेंद्रियाणांप्रकर्षोवावीरः॥वर्णोस्यगौरः॥देवतंशक्रः॥

सचत्रिधा॥युद्धवीरदानवीरदयावीरभेदात्॥दयांतुविशेषः॥सर्वोत्साहोद्युद्धवीरेप्रतापाध्यवसायादिप्रभवः॥दयावीरेआर्द्रतादिप्रभवः॥युद्धवीरोयथा॥संग्रामां
गणमागतेदशमुखेसौमित्रिणाविस्मितंसुग्रीवेणविचिंतितंहनुमताव्यालोलमालोकितं॥श्रीरामेणपरंतुपीनपुलकस्फूर्जत्कपोलश्रियासाश्रुनंदरसालसा
निर्धीरेबाणासनेदृष्टयः॥दानवीरोयथा॥अभ्यागच्छतिमंदिरंद्विजकुलेखंडायखंडाबुधिंक्षाराब्धिंलवणायदुग्धजलधिंदुग्धायवेदास्यति॥दुर्वारोविरहेभ
वेदितिभियाशीनेनदिव्यापगायस्यांघ्रिंनजाहातिविप्रवपुषेरामायतस्मैनमः॥दयावीरोयथा॥दयावीजहरेर्नैत्रमंकुरःस्तत्रभास्करः॥नलःसमुत्थितेवेतोपल्लु
वैरामलक्ष्मणे॥भयस्यपरिपोषःसर्वेंद्रियाणांविक्षोभोवाभयानकः॥वर्णोस्यश्यामः॥दैवतंयमः॥सचस्वनिष्ठःपरनिष्ठश्च॥अपराधात्स्वनिष्ठोयथा॥गो
पीक्षीरघटीविलुठनविधिव्यापारवार्ताविदोःपित्रोस्ताडनशंकयाशिशुवपुर्देवःप्रकारयज्वरं॥रोमांचंरचयन्दृशौमुकुलयन्प्रत्यंगमुत्कंपयन्नूसीत्कुर्वन्नतमसिप्रस
र्पतिगृहंसायंसमागच्छति॥परनिष्ठोयथा॥गंगायाःसलिलेनिमज्जतिजटाजूटोपरिभ्राम्यति॥सर्पासृग्हुताशनेफणिफणाभोगेकचिल्लीयते॥कुंजीभूयहरस्यक
र्णसुषिरंनिर्गंतुमुत्कंठतेराहोरास्यमुदीक्ष्यकिंभकुरुतेवालस्तुषारद्युतिः॥विकृतनिनदात्परनिष्ठोयथा॥कुर्वालेदशाभिमुखेईशमुखेनारदसुरैःकंपितंदिङ्नागै
श्यकितंहरेरपिह्येहसुछनाधावितं॥सुग्रीवस्तुसमुत्कलज्जालधियाव्यालोलदृष्टिमिश्रमिश्रपस्तेतुविशंकयाहनुमतोवक्त्रेदृशौसंदधे॥जुगुप्सायाःपरिपोषोवीभत्सः
सर्वेंद्रियाणांसंकोचोवा॥वर्णोस्यनीलोदैवतंमहाकालः॥सचस्वनिष्ठपरनिष्ठश्चेति॥स्वनिष्ठोयथा॥कालीकुंडलिनीकुतूहलमिथःप्रारब्धयूथुत्कारनंवचर्वीव
लक्ष्मिहायसिवलक्षिलीनिपातस्पर्शी॥बध्यस्पर्धविपक्षपक्षरुधिरस्त्रोतस्विनीस्त्रोतसिभ्रूपस्पृष्टुतिस्खलत्स्थपणक्रोधाकुलेभार्गवः॥परनिष्ठोयथा॥छत्रंकुंभींद्र
कृणैर्विरचयतनुतंचामरंव्यालपुरुषेमालांमुंडैश्चंडेःस्त्रजगजनघनेमंडपंयोजयस्व॥अंत्रैर्नीराजनायाःकलयविधिमितिप्रेतस्थांगनाममालापःकुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८३

उल्लिन्यास्तनयपरिणयारंभलज्जावभृथ॥ विस्मयस्य सम्यक्समृद्धिरद्भुतः॥ सर्वेंद्रियाणांतरस्तंभवा॥ वर्णोस्यपीतोदेवितंत्रस्था॥ सचस्वनिष्ठपरनिष्ठश्च॥
स्वनिष्ठोयथा॥ लीलानिबद्धपाथोधिहेलाहृतदशाननः॥ सरामःसीतयाश्लिष्टो आत्मानंबहुमन्यत॥ परनिष्ठोयथा॥ यत्काजीर्णहकूलवदसुमतीबद्धोंबुधि
र्बिंदुवत्तूबाणाग्रेणजरत्कपोतैरवध्यापादितोरावणः॥ लंकाकापिविभीषणायसहसामुद्रेवहस्तेर्पिता॥ श्रुत्वेवंरघुनंदनस्यचरितंकोवानरोमांचति॥ अत्युक्ति
भ्रमोक्तिचित्रोक्तिविरोधाभासप्रभृतयो[illegible]ता एव॥ अत्युक्तिर्यथा॥ भूपादेषसतोद्धितामभगवान्कोपावतारोहरिः॥ सिंधौकुंभशमायस्यदशाननांतेस्थि
तापभुवः॥ ताराहारलिवारिस्तिलकलतिस्त्ववीह्रिनीमाल्यतिक्रीडादर्पणातिशपापाणिस्रुर्दैवश्वनाटकाति॥ यथावा॥ दिव्यहरेर्मुखकुहरे विस्तीर्णपर्णतिव्योम॥ चूर्णति
चंद्रः क्रमुकति कनकगिरिः खदिरसारथिः रवांशुः॥ भ्रमोक्तिर्यथा॥ लिबिंबेलिग्मरुचः करैःपरिचितांसेकुंकपोलस्थली नीरागानिकरंकरेणहरताभूच्छीकृते वारिधौ॥
मैनाकंसमुदीक्ष्यपक्षपतिलंशालूकशंकाकुषोहरंबस्पयुनातुदंतशिखरव्यापारलीलारसः॥ यथावा॥ अंतःक्रोधाग्निजाग्रत्कपटनहरिस्फारनिश्वासवात्याधूता
वारिवाहाः कुलधराणिभृतः सानुषुप्रस्खलंतः दिङ्नागैर्नागाबुध्याकनहरिलकुलैःशंकयाशाहलानांघ्रायाभ्रांत्यावकिरातैः सितिबसेनधियावीक्षितास्त्वर्वधूभिः॥
चित्रोक्तिर्यथा॥ गिरर्वमतिमौक्तिकावलिमल्लिहृंपरस्तावरंशरत्तुहिनदीधितिव्यजनमारुतंवांछति॥ धनुस्तापितिमान्मथंशिथिलवंधमंधंतमोनमोमनसिजायतेकिमपि
कौतुकंतन्वते॥ लासणिक्रमरविलंचित्रोक्तिरेव॥ विरोधाभासोयथा॥ कोप्यसोलवमुकुंदनंदकोनंदकोभवतिकंससंदरः॥ कुंडलीत्वमसिकालियंकुतोदूरतोनय प०
सितंनिवेदय॥ नाप्येचरसर्वेरसाआनंदरूपाः॥ अद्भुताख्याः॥ परनिष्ठाएव॥ चित्तवृत्तिर्द्वेधा॥ प्रवृत्तिनिवृत्तिश्च॥ तत्रनिवृत्तौयथाशांतरसस्त रा०
थाप्रवृत्तौमायारसइतिप्रतिभाति॥ एकत्ररसोत्पत्तिरपरत्रनेतिवक्तुमशक्यत्वात्॥ नचरसत्तिरेव॥ तद्धिसकस्यापुव्यभिचारी॥ नशृंगारस्य॥ तद्वैरिणो १५

बीभत्सस्यापितत्रसत्वात्॥ अतएवनबीभत्सस्यापिनहास्यस्यतद्वैरिणःकरुणस्यापितत्रसत्वात्॥ अतएवनाद्भुतस्यापिनवीरस्यतद्वैरिणोभयानकस्यापितत्रस
त्वात्॥ अतएवनभयानकस्यापि॥ नापिशांतस्यतस्यतद्विरोधित्वात्॥ नचसामान्यएवरसः॥ तद्विशेषाइतरेभवंतीतिवाच्यं॥ शांतरसस्यनर्हिरसाभावत्वापत्तेः
किंतुविकृतएवरतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्पद्यंते॥ विलीयंतेच॥ तेनतत्रतेव्यभिचारिभावाइति॥ लक्षणंचप्रबुद्धमिथ्याज्ञा
नप्रासनामायारसः मिथ्याज्ञानस्परस्थायीभावः विभावाः संसारिकभोगार्जकधर्माधर्माः॥ अनुभावाः पुत्रकलत्रविजयासाम्राज्यादयः॥ यथा॥
क्वापि वाटीलाटीदृग्भोरुहरभसकरीवापिकाकांतत्वंचद्रानुकूल्यंप्रकटयतिमिथःकामिनीकामनीति॥ रूपंकामानुरूपंमणिमयभवनंबंधुरंबंधुरागोलोकेलोकेश
कस्यत्यमसिनभुवनेसर्वदासर्वदाता॥ नाप्यभिन्नेपरंनिर्वेदःस्थायीभावः॥ शांतोपिनवमोरसोभवतीति॥ निर्वेदस्यपरिपोषःशांतोरसः॥ दोषप्रशमोवा॥ दो
षाःकामक्रोधादयः॥ अस्यविषयदोषविचारविरक्तयादयोविभावाः॥ अनुभावाः आनंदाश्रुपुलकहर्षगद्गदवचनादयः॥ यथा हेयंहर्म्यमिदंनिकुंज
भवनंश्रेयंपरंस्वंधनंपेयंतीर्थपयोहरेर्भगवतोगेयंपदांभोरुहं॥ नेयंजन्मचिरायरंभशयनेधर्मेनिधेयंमनःस्तेयंतत्रसितासितस्यसविधेध्येयंपुराणे
महः॥ यथावा॥ वेदस्याध्ययनंकृतंपरिचितंशास्त्रंपुराणंश्रुतंसर्वंव्यर्थमिदंपदंनकमलाकांतस्यचेत्कीर्तितं॥ उत्खातंसदृशीकृतेविरचितःसेकोंभसा
भूयसासर्वंनिष्फलमालवालवलयेसिक्तंनबीजंयदि॥ इतिश्रीभानुदत्तमिश्रविरचितायांरसतरंगिण्यांरसनिरूपणंनामसप्तमस्तरंगः॥ ७॥ ६
स्थायिभावजादृष्टिरष्टधा॥ स्निग्धाहृष्टादीनाक्रुद्धादृप्ताभीताजुगुप्सिताविस्मिताचेति॥ व्यभिचारिभावजादृष्टिर्विंशतिधा॥ शून्यामलिन्याश्रांता
लज्जिताशंकितामुकुलितार्धमुकुलाग्लानाजिह्माकुंचिताविवर्तिताभितप्ताविषण्णाललिताकेकराविकोशाविश्रांताविप्लुतात्रस्तामदिरेति॥ सरभेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टधारसघष्टिः ॥ कांताहास्यात्करुणारौद्रावीराभयानकाद्वीभत्साद्भुतांचेति ॥ षड्विधं द्देहा दृष्टयः ॥ कृणिताविकसितार्धविकसिताचकितामुग्धा घूर्णितालसा
विवर्तितार्धविवर्तिता पर्यस्ताभ्रान्त्या स्तिमिताचित्यादयो दृष्टिभेदाउन्नीयाः ॥ तत्र ललितायथा ॥ मनसिजनृपतिर्वा मंडनं वा महोवा यदशिशुरविभुवनं वा
यौवनं वा यथेवा ॥ अखिलमपिस्फुतार्थं वीचिविक्षेपरेकेलत्कमलविनयलीलाशोभिनालोचनेन ॥ ग्लानायथा ॥ पर्यस्तालकरोचिषः श्रमजुषः प्रस्वेदगंड
लिपः श्रीभौमीतलशीकरेन शशिनावातं समानन्वति ॥ जीयास्तामचलाधिपात्मदुहितुर्निष्यंदनीलोत्पलच्छायानिह्नितचंचरीकमिथुनस्पर्धासमृद्धेदृशो ॥
एवमन्योप्युदाहरणीयाः ॥ अथ रसानां जन्यजनकभावः ॥ तत्र भरतः ॥ शृंगाराद्धि भवेद्धास्यो रौद्राच्च करुणोमतः ॥ वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥
अयमुत्सर्गः ॥ परेषामपि रसाणां कार्यकारणभावदर्शनात् ॥ पूर्वग्रंथकारसमतिरपि ॥ कथासंग्रहयोगाच्च विवक्षावशतः कवेः अन्योन्यं जन्यजनकं रसभावाभवं
स्यमी ॥ यथा ॥ मातुर्दृष्ट्वा गंभीरोरुयुगलगलद्बाष्पधारासुहारां तातस्य प्रेक्ष्य वक्षः स्वकरुधिरचयं कुप्यता भार्गवेण ॥ हत्वेन्यस्तः सहस्रार्जुनरमनस्मार्गभगंभीर
वीर्यः स्फूर्जद्दोर्वल्लिहल्लौ सकसकलकलासूत्रधारः कुठारः ॥ अत्र वीरं प्रति करुणबीभत्सयोः कारणता ॥ यथा वा ॥ तात चरणानां ॥ कुरंगास्या वेणीं सुभगवि
परीतेरतिविधावधिसंक्रम्य दृष्ट्वाक्लिमपिनिपतंतीमभिभटः ॥ अधिग्रीवं युग्मप्रचलकरवालव्यतिकरं स्मरन्नेव त्रस्तोथाविरमतिपरीरंभणरसात् ॥ अत्र भयानकं
प्रतिशृंगारस्यकारणता ॥ यथा वा ॥ युधिकुपितक्रतांतस्यंदनस्पर्धिनादं रिखिरिखिदशकंठस्तत्कवान्वारिहास्त्रं ॥ नडितिजनकपुत्र्याः साम्यमालोकमानस्त्रज
तिनपवनास्त्रं राघवः स्विन्नपाणिः ॥ अत्र शृंगारं प्रति वीरस्य कारणता ॥ एतेषामांगागीभावापन्नानां रससंकरइति नामलोका लपंति ॥ रसानां मिथो विरोधोपि ॥
तत्र भरतः ॥ शृंगारबीभत्सरसौ तथा वीरभयानकौ ॥ रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ वैरिरसस्य वैरिरसेर्द्वविभावानुभाव व्यभिचारिभावा अपि ॥

रसहानिकराइतितानपिवारयेत् ॥ तत्र प्राचीनसंमतिः ॥ न च वैरिरसं ब्रूयाद्वैरिणोनविभावकं ॥ नानुभावं न संचारिभावं चापि कदाचनेति ॥ किंत्वंगांगिभावाना
पन्नयोरेकदेशे सति वैरं देशभेदे सति नवैरं एकैकपि संयोगं तद्भावयोरिव समयभेदे सत्यपि न वैरं ॥ भूतले घटस्तदभावयोरिव ॥ देशेयथा ॥ प्रियेणालिंग्यमा
नायाः प्रियायाः कुचकुंभयोः ॥ क्रूरजस्रतन्निर्मुक्तं रुधिरं कुंकुमायते ॥ देशभेदे सति विरोधाभावोयथा ॥ एकः सिंधुभुवः करे विलुलितः वक्त्रे द्वितीयः स्थि
तः कामध्वंसिनिकालकूटकवलक्लिष्टेसतीयोद्धतः ॥ भूयः क्षीरनिधेर्मनप्रथमने सत्कश्चतुर्थस्तथा पायासुः कमलापतेर्भगवतो नानारसाः पाणयः ॥
अत्र शृंगाररौद्रकरुणाद्भुतरसानां विरोधाभावः ॥ समयभेदे सति विरोधाभावोयथा ॥ भग्नं कामरिपोर्धनुः परिहृतं राज्यं स्थितं कानने निर्भिन्नः त्रिशिराखरस्त
पिशितांस्पृष्टं कपिर्लालितः ॥ लंकेशोदलितः श्रियायरुहितं लंकावधूनांश्रुतं नीतासप्रविदेरुभूतलदरविलं रामस्यलोकोत्तरं ॥ अत्राद्भुतशांतभयानकरौद्रबी
भत्सहास्यवीरकरुणशृंगाराणां विरोधाभावः ॥ अंगांगिभावापन्नानां रसानां विनिवेशोयत्र सरसशबलइतिवेदितव्यं ॥ तस्याप्येतदेवोदाहरणं ॥ अंगयोर्वैरेपि
न रसहानिः ॥ भव्योर्वैरिभोरिव ॥ यथा ॥ सीतां संस्मर्य वीचि प्रचलकुवलयस्पर्धि चक्षुः क्षिपंती सेनां संवीक्ष्य रक्षः शरदलितवपुः शोणितासारसिक्तां ॥
रामेण क्रोधदर्पद्दशमुखनिपतन्मुंडलाभप्रमोदक्रीडत्कालीकरालभ्रुकुटिसहचरीरंदधे चापयष्टिः ॥ अत्र शृंगारबीभत्सयोर्विरोधेपि न रसहानिः ॥ एव
मंगांगिभावापन्नयोर्विरोधिनोरेकाश्रभावेपि न रसहानिः ॥ यथा ॥ भौजंगं मंत्रिरिमयंजलधात्मकं वा शस्त्रं यदेवमुमुचे दशकंधरेण ॥ सर्वं विरहतनयाविरहा
कुलेन रामेण वह्निमयशस्त्रमिव व्यलोकि ॥ ननु बीभत्सशृंगारयोः सहजं वैरं कुतः मधुनिपीयनिष्ठीवतोः संभोगदर्शनादिति चेत्सत्यं ॥ बीभत्सस्य जुगुप्सारूपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभावः॥ साचतद्दर्शनेनतदरुचस्यभवति॥ ननुतयोरागोरकंव्याहतिति॥ ननुतथापिबीभत्सेशृंगारोदयपत्ते॥ तथाहि॥ यदपिहि विशालामुंडमालांन पाणिस्त्यजति
नरकपालंरौरवंचचर्मचेलंतदपिगिरिसुतायाः पक्षपातःपुरारौ समुत्पत्ति विचित्रःकामिनोःप्रेमबंधः॥ इतिचेत्सत्यं॥ निजभर्तुरधमेपिभूषणोशत्वपुलिशयेन
पत्यास्तत्रजुगुप्सैवनाचतरति॥ जुगुप्सितत्वेनप्रतीयमानमेव॥ हिजुगुप्सोत्साहकंभवति॥ किंचेंद्रियसंबंधोपाधिकंमत्रप्रेमैवोत्पद्यते॥ तस्मात्तत्रविभावाभा
साद्बीभत्सस्तत्रनजायतइति॥ ननुवीरस्यधुधिगच्छतः सर्पस्पर्शचकितनारोहकस्मिकोत्पातालिपातेविस्मयरति चेत्सत्यं॥ चकितताविस्मयस्यतत्ररसावेशान्न
भवत्येव॥ सतिव्याविषयभेदः॥ वीरस्यनप्रतिभटइयंकिंतुभुजंगमाहीश्च्चाः नप्रतिबलबलाधिक्येविस्मयः॥ किंतुपौल्योतरसवेरस्योत्साहकमखिलमवधेयं॥
तत्रपूर्वाचार्याः॥ अन्यच्चरसवैरस्योत्साहकंवचनं॥ तथा॥ नवान्यरसभावज्ञैर्नाव्यशास्त्रविशारदैः॥ वचनमित्युपलक्षणं॥ एवंविभावानुभावेष्वपिद्रष्टव्यं॥ यथा
काहंक्वत्वंक्वमधुसमयःक्वत्रवाद्भूतिकासौमेघछायप्रतिबलमिदंप्रेमवाक्वत्रयूनोः॥ आयुर्वायुप्रचलनलिनीवारिविंदूपमानंमानंमुग्धेविसृजसिकलंलुब्धमेवंप्र
तीमः॥ अत्रनिर्वेदस्मृतिपादकमखिलंतच्चशृंगारविरोधि॥ अनौचित्यंचसर्वथाप्यवधेयं॥ तत्रप्राचीनग्रंथकृतः॥ अनौचित्यादृतेनान्यद्रसभंगस्यकारणं॥ प्रसिद्धौ
चित्यबंधस्तुरसस्योपनिषत्परा॥ इत्युद्वेगकरमनौचित्यं॥ तस्माद्द्वयोर्यूनोर्यत्रमिथोरतिस्तत्रैवरसः॥ एकस्यरतिस्त्वेद्रसाभासएव॥ एकस्यारसस्त्वेद्रसाभासएव॥
यथा॥ सीतासमागमश्लाघावंधुरंदशकंधरं॥ मुहुर्लक्ष्मणेकामोरामोवानिशितैःशरैः॥ अत्ररावणस्यैवरतिर्नतुसीतायाः॥ निधुवनवचनभ्रांतेयातेचलेनयनांचलैः
क्रिमिलिवलितग्रीवंमुग्धेमुहुर्मुहुरीहसे॥ विफलमखिलंयूनोर्नोचेदुदेतिपरस्परं रतिरथमनोजन्मारंभःसएवनिषेव्यतां॥ अत्रनायिकायाएवरतिर्नतुनायकस्य॥ राम
एवमेकस्यानेकविषयारतीरसाभासएव॥ परंत्वेषएवविशेषः॥ यस्ययस्यवस्त्विताबाह्व्योनायिकाभवंतितत्रनरसाभासः॥ तथासतिकृष्णस्यसकललोकनायक १७

स्यबहुवधूकामिनीविषयायारतेराभासत्वापत्तेः॥ तस्मादव्यवस्थितबहुकामिनीकवैशिकनायकपरमेतत्॥ अतएववैशिकानांवेश्यानांचरसाभासइतिप्राची
नानांमतं॥ एकस्याअनेकविषयारतिर्यथा॥ संपक्वस्याद्युतारामवतिलरतिजायत्पुरोनेत्रतारामहस्तकेगोष्ठकांचीयदभिमुखगतावेपतेरत्नकांची॥ उग्रःक
स्याधुनुष्ठःसखियत्तुगमेकश्चिद्दुरोभिपातःस्नातंकेनाद्यवेणीपयसिविलुलितायत्कृतेकापिवेणी॥ अत्रकिमोबाहुल्येनवेश्यात्वं॥ एकस्यानेकविषयार
तिर्यथा॥ पंचेषुक्षितिपप्रतापलहरीप्रीतिस्तहरीयाधुनःकासांनस्तनकांचनाचलतटेकाश्मीरपंकायते॥ कासांमूर्धनिनैवपंकजदृशांसिंदूरलेखायतेकासां
वान्नवकर्णयोः प्रियसखेमाणिक्यभूषायते॥ अत्रापिवैशिकताप्राग्वदेव॥ यत्ररसाबहवःसरसशबलः॥ यत्रभावाबहवःसभावशबलः॥ अत्ररसशबलोदृश्य
तः॥ भावशबलोयथा॥ प्रत्यक्षेपृथुभंममश्रुतिपथंजायेततत्सावनःश्वश्रात्प्रेममकःस्मरस्त्रिजगतीशून्यविनाराधया॥ निर्मुक्तेवमनस्वपामगराशोलाव
ण्यमन्याद्दृशौधिग्जन्मधृगतासिकिंविलपितैःकासिप्रसन्नाभव॥ निर्वेदोत्सुक्यामर्षभ्रममतिस्मृतिविषादैन्यानांभावानांसांकर्यादिषभावशबलइति॥
अथरसभावालंकाराणामभिव्यक्तिः॥ रसस्त्रिविधोभिमुखोविमुखःपरमुखश्चेति॥ अन्यैर्भावविभावानुभावैर्यस्याभिव्यक्तिःसोभिमुखः॥ भावविं
भावानुभावानामनुक्तत्वात्कष्टावगमोविमुखः॥ परमुखोपिद्विविधः॥ अलंकारमुखोभावमुखश्चेति॥ अलंकारमुखेलंकारोमुख्योमनोविश्रामहेतुत्वा
त्॥ रसोगौणः॥ भावमुखेभावोमुख्योमनोविश्रामहेतुत्वात्॥ रसोगौणः॥ अत्रप्राचीनसंमतिः॥ अलंकारेचरुचिरेमनोविश्रांतिकारिणि॥ अलंकारस्य
मुख्यत्वंगौणत्वंरसभावयोः॥ अभिमुखाःस्वस्वप्रकरणेउदाहृताः॥ विमुखोयथा॥ मैथिलीलक्ष्मणोरामःसुग्रीवःपवनात्मजः॥ लंकापुरंपरित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसतरंगीणी
१९

मु
ज्यप्रारंभारिनिधेर्यथुः॥अत्रसंकटमखिलंसंतीर्यैतेसमागताःस्फुतोरसः॥कष्टाद्वगम्यते॥अलंकारमुखोयथा॥एषानलेखाभ्रमतामलीनांभाति
प्रभातेनवकैरविएषाः॥आलिंगितःकिंतुतुषारभानोःकांतिःकलंकस्यवपुर्विलग्ना॥अत्रापह्नुतेरलंकारस्यमुख्यता॥भावमुखोयथा॥सप्तांभोनिधिनीर
हीरपटलालंकारिणींमेदिनींदातुंविप्रकुलाययोजितवतःसंकल्पवाक्योयमं॥नाभीनीररुहासरोरुहभुवातत्कालमाविष्कृतेहस्तांभोरुहिभार्गवस्यकिमपि
श्रीडास्मितंपातुवः॥अत्राह्लुभावस्यमुख्यता॥दानवीररसोगोणःविद्वद्भरिधराःस्नेहंतथावर्षंतुसंततं॥लभतेविपुलांवृद्धिंयथारसतरंगिणी॥अव
गाहस्ववाग्देविस्थिरांरसतरंगिणीं॥अस्मल्लयेनपप्मेनरचयश्रुतिभूषणं॥२॥यावद्भानोःसुताकापिकालिंदीभुविवर्तते॥तावत्तिष्ठतुमेभानोरेवार
सतरंगिणी॥३॥इतिश्रीभानुदत्तमिश्रविरचितायांरसतरंगिण्यांरसाभासनिरूपणंनामाष्टमस्तरंगः॥समाप्तेयंरसतरंगिणी॥ ॥श्रीरस्तु

॥इमांतरंगिणींज्ञात्वायःकरोतिपरिश्रमं॥तस्यप्रौढतराबुद्धिःकाव्येसर्वत्रजायते॥

रंम
१८

18.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 12:02
,TRANSFERRED=2020/10/22 at 12:05:20
,PAGES=18
,TYPE=STD
,NAME=S0004367
,Book Name=M-824-RASTRANGGINI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection